नं० ८०३ - घ

ध्वन्यालोकलोचनम् (अलंकारशास्त्रम्)

पत्राणि १६१ (सम्पूर्णम्)

कर्त्ता आनन्दवर्धनः

अभिनवगुप्तः

नं० ८०२८
ध्वन्यालोकलोचन
१६१ पत्राणि
अलङ्कारशास्त्र-संपूर्ण
कर्ता आनन्दवर्धन:
अभिनवगुप्त:

ध्वन्यालोचनं सटीकं १८२
६०००

ॐ· ध्वन्या· लो· १

ॐस्वस्तिश्रीगणेशायनमः ॥ अपूर्वंयद्वस्तुप्रथयतिविनाकारणकलां जगद्ग्रावप्रख्यंनिजरसभरात्सारयतिच
क्रमात्प्रख्योपाख्याप्रसरसुभगंभासयतितत्सरस्वत्यास्तत्त्वंकविसहृदयाख्यंविजयताम् ॥ भट्टेन्दुराजचरणाब्ज
कृताधिवासहृद्यश्रुतोभिनवगुप्तपदाभिधोहम् यत्किंचिदप्यनुरणन्स्फुटयामिकाव्यालोकंसुलोचननियोजन
याजनस्य ॥ स्वयमविच्छिन्नपरमेश्वरनमस्कारसंपत्तिचरितार्थोपिव्याख्यातृश्रोतॄणामविघ्नेनाभीष्टव्याख्याश्रव
णलक्षणफलसंपत्तयेसमुचिताशीःप्रकटनद्वारेणपरमेश्वरसांमुख्यंकरोति वृत्तिकारः स्वेच्छेत्यादिना ॥
मधुरिपोर्नखाः युष्मान्व्याख्यातृश्रोतॄन्त्रायन्ताम् तेषामेवसंबोधनयोग्यत्वात् संबोधनसारोहियुष्मदर्थः त्राणं
चाभीष्टलाभंप्रतिसाहाय्यकाचरणम् तच्चतत्प्रतिद्वंद्विविघ्नापसारणादिनाभवतीति इयदेवत्राणंविवक्षितम्
नियोगियोगिनश्चभगवतोसंमोहाध्यवसाययोगितेनोत्साहशक्तीतेवीररसोध्वन्यते नखानांप्रहरणत्वे प्रहरणे
नचरणलक्षणेकर्तव्येनखानामव्यतिरिक्तत्वेनकरणत्वात्स्वातिशयशालिनाकर्तृत्वेनसूचिना ध्वनितश्चपरमेश्वरस्यव्य
तिरिक्तकरणापेक्षाविरहः मधुरिपोरित्यनेनतस्यसदेवजगत्त्रासापसारणोद्यमउक्तः कीदृशस्यमधुरिपोः स्वे
च्छयाकेसरिणोनतुकर्मपारतन्त्र्येण नाप्यन्यदीयेच्छया अपितुविशिष्टदानवहननोचिततयाविधेच्छापरि
गृहीतोचितत्वादेवस्वीकृतसिंहरूपस्येत्यर्थः कीदृशानखाः प्रपन्नानामार्तिच्छिन्दन्ति नखानांहिच्छेदकत्वमुचितम्
आर्तेःपुनश्छेद्यत्वं नखान्प्रत्यसंभावनीयमपितदीयानांनखानां स्वेच्छानिर्माणोचितत्वात्संभाव्यतएवेतियावत् ।
अथवात्रिजगत्कंठकोहिरण्यकशिपुर्विश्वस्यार्तिच्छेदकइतिसएववस्तुतः प्रपन्नानांभगवदेकशरणस्थितीनां १

जनानां मार्त्तिकारित्वान्मूर्तैर्वार्त्तिः तं विनाशयद्भिरार्त्तिरेवोच्छिन्ना भवतीति परमेश्वरस्य तस्यामप्यवस्थायां कारुणिकत्व
मुक्तम् । किंवते गुणाः स्वेच्छेन स्वच्छतागुणेन नैर्मल्येन स्वच्छमृदुप्रभतयोद्दिमख्यातया भावशून्यत्व एव स्वच्छायया च वक्र
रूपत्वरूपया आकृत्या आयासितः खेदितश्चन्द्रः यैः अत्रार्थशक्त्युद्भवेणानुस्वानेन ध्वनिना बालचन्द्रत्वं ध्वन्यते आयासेन तत्साम्य
योचन्द्रस्य विच्छायत्वप्रतीतिः अपह्नुतिस्तु ध्वन्यते आयासकारित्वं च नखानां स्वप्रसिद्धं ननु दृष्टिनखानां लोकोत्तरेण ।
रूपेण प्रतिपादितम् । किं च तदीयां स्वच्छतां कुटिलिमानं चावलोक्य बालचन्द्रः स्वात्मनि खेदमनुभवति तस्योपि स्वच्छ
कुटिलाकारयोगेऽप्यमी प्रपन्नार्तिनिवारणकुशला न त्वहमिति व्यतिरेकालंकारध्वनिः । किं वाहं पूर्वमेक एवासाधा

ॐ नमः शिवाय ॥ ॐ स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः । त्रायन्तां वो मधुरिपोः प्र।
पन्नार्तिच्छिदो नखाः ॥ १ ॥

रणैवैरायच्छत्याकारयोगात्समस्तजनाभिलषणीयताभाजनमभवमधुनैते विविधादृशा बालचन्द्राकाराः संतापार्तिच्छे
दकुशलाश्चेति नानेव लोको बालेन्दुर्वर्द्धमानेन पश्यति ननु मामित्याकलयन्बालेन्दुरविरतमायासमनुभवतीत्युत्प्रे
क्ष्यते इत्युत्प्रेक्षापह्नुतिध्वनिरपि एवं वस्त्वलंकाररसभेदेन त्रिविधो ध्वनिरत्र श्लोके संकरेणाभिव्यक्तः । अत्र शास्त्रान्तेना
भिधेयस्वरूपमभिदधत् प्रधानतया प्रयोजनप्रयोजनं तत्संबद्धं प्रयोजनं च सामर्थ्यात्प्रकटयन्नादिवाक्यमाह ॥ १ ॥

ॐ·
ध्वन्या
लो·
२

काव्येति काव्यात्मशब्दसन्निधानाद्बुधशब्दोऽत्र काव्यात्मावबोधनिमित्तक इत्यभिप्रायेण विवृणोति ॥ काव्यतत्त्वविद्भिरिति
आत्मशब्दस्य तत्त्वशब्देनार्थं विवृण्वानः सारत्वमपरशब्दवैलक्षण्यकारित्वं च दर्शयति इति शब्दः स्वरूपपरत्वं ध्वनिश
ब्दस्याचष्टे तदर्थस्य विवादास्पदीभूततया निश्चयाभावे अर्थतत्त्वायोगात् एतद्विवृणोति संज्ञित इति वस्तुतस्तु न न
संज्ञामात्रेणोक्तमपि तु अस्त्येव ध्वनिशब्दवाच्यं प्रस्तुतसमस्तसारभूतं तत्त्वम् यावद्यास्ताहृदयामामनेत्रः [कथ्ययेरन्]

ॐ काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वस्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये के
चिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम् ॥ बुधैः
काव्यतत्त्वविद्भिः काव्यस्यात्मा ध्वनिः संज्ञितः परम्परया यः समाम्नातः सम्यगाम्नातः तस्य सहृद
यजनमनःप्रकाशमानस्याप्यभावमन्ये जगदुः तदभाववादिनां चामी विकल्पाः संभवन्ति ॥

इत्यभिप्रायेण विवृणोति तस्य सहृदयेत्यादिना एवं त्वयुक्ततरं इति शब्दो भिन्नक्रमं वाक्यार्थपरामर्शकः।
ध्वनिलक्षणोऽर्थः काव्यस्यात्मेति यः समाम्नातः शब्दपरामर्शकत्वे हि ध्वनिसंज्ञितोऽर्थ इति कासंगतिः एवं हि
ध्वनिशब्दः काव्यस्यात्मेत्युक्तं भवेत्तद्विस्मयमाहेति यथा न च विप्रतिपत्तिस्थानमसदेव प्रस्तुतस्यैव यथानि
णां धर्ममात्रकृतां विप्रतिपत्तिरित्यलम् प्रस्तुतेन भूयः सा सहृदयजनोद्वेजनेन तु यस्यैकस्य ग्रामादिकमपि

च

श्रुताः

तथाभिधाने स्यान्न तु भूयसां तत्प्रक्रमम्। तेन बुधैरिति बहुवचनम्। एतदेव व्याचष्टे परम्परयेति अविच्छिन्नेन प्रवाहे
ण तैरेतदुक्तं विनापि विशिष्टपुस्तकेषु विवेचनादित्यभिप्रायः। न च बुधा भूयांसो नादरणीयं वस्तु आदरेणोपदिशेयुरिति
तस्मादादरेणोपदिष्टं तदाह सम्यगाम्नातपूर्व इति पूर्वग्रहणेन इदं प्रथमतानात्र संभाव्यत इत्याह व्याचष्टे च समाख्यात
सम्यगासमन्तात् ख्यातः प्रकटितः तस्येति यस्याधिगमाय प्रस्तुतयत्नतीयेकातत्राभावसंभावना अतः किञ्चि
मेः अपारं मौख्यमभाववादिनामिति भावः। न चास्माभिरभाववादिनो विकल्पाः कृताः किं तु संभाव्य दूषयिष्यन्ते अतः प

केचिद्वावदीरन् शब्दार्थशरीरं तावत्काव्यं तत्र शब्दगताश्चारुत्वहेतवोऽनुप्रासादयः प्रसिद्धा ए
व अर्थगताश्चोपमादयः वर्णसंघटनाधर्माश्च ये माधुर्यादयः तेऽपि प्रतीयन्ते तदनति
रिक्तवृत्तयो वृत्तयोऽपि याः कैश्चिदुपनागरिकाद्याः प्रकाशिताः ता अपि गताः श्रवणगोचर
म् रीतयश्च वैदर्भीप्रभृतयः तद्व्यतिरिक्तः कोऽयं ध्वनिर्नामेति २॥

रोक्षत्वं न च भविष्यद्वस्तु दूषयितुं शक्यम् नत्पन्नत्वादेव तदपि तु आरोपितं दूष्यते इति चेत् तु आरोपितत्वादेव भविष्यत्त्वा।
ह्यातिः अतो भूतकालोन्मेषात्परोक्षा हि शिष्टाय तत्र तु शतिभानाभावाल्लिटप्रयोगः कृतः जगदुरिति तद्व्याख्यानायैव
संभाव्य दूषणं प्रकटयिष्यति संभावनापि नेयमसंभवतोऽयुक्ता अपि तु संभवत एव। अन्यथा संभावनानामर्मिथ्याविषयमा।
णानां समर्थयितुं पूर्वं संभवतीत्याह संभाव्यन्ते इति तु ब्रुवाणेनैतु तत्कार्यमेव स्यात् न च संभवस्य संभावना अपि तु वर्तमान

पर्यवसानं स्यात् दूषणानां वा।
अतः संभावनानाम = २

चे २३

ध्व. न्या. लो. २

तेव स्फुटे निर्वर्तमाने नैव निर्देशः नन्वसंभवद्वस्तुमूलया संभावनया यत्संभावितं तन्न दूषयितुमशक्यमित्याशंक्याह
विकल्प्य इति ननु वस्तु संभवति नाह क. यत इयं संभावना अर्पितविकल्पैव तेवनत्रावेगायवंध्यतयास्फुरेद्भूरपि स्व
नयवादीरन्नित्यादयोत्र संभावनाविषया लिङ्प्रयोगा अतीतपरमार्था एव पर्यवस्यंति यथा यदि नामास्य कायस्य यदं
तस्तद्बहिर्भवेत् दंडमादाय लोकोयं शुनः काकांश्च वारयेत् ॥ इत्यत्रार्थाघघेवं कायस्य हृष्टता स्यात्तदेवमवलोकिते
तिभूतत्वेनैव यदि न स्यात्ततः किं स्यादित्यनेनापि किं कृतं यदि न पूर्वं भवनस्य संभावने स्वयमेवार्थ इत्यलमप्रकृतेन बहु
ना तत्र समयापेक्षणेन शब्दोर्थप्रतिपादक इति कृत्वा वाच्यव्यतिरिक्तो नास्ति व्यंग्यं सदपि वा तदभिधावृत्त्याक्षिप्तं शाब्दाव
गतार्थबलाकृष्टत्वाद्भाक्तम् तदनाख्येयमपि वा न वक्तुं शक्यम् कुमारीष्विव भर्तृसुखमिति त्रय एवैते प्रधा
नविप्रतिपत्तिप्रकाराः तत्राभावविकल्पस्य त्रयः प्रकाराः शब्दार्थगुणालंकाराणामेव शब्दार्थशोभाकारित्वाल्लोकप्र
सिद्धातिरिक्तसुन्दरशब्दार्थमयस्य काव्यस्यान्यः शोभाहेतुः कश्चिदन्योस्ति योस्माभिरगणित इत्येकः प्रकारः
यो वा न गणितः स शोभाकारी न भवतीति द्वितीयः अथ शोभाकारी भवति तर्ह्यस्मदुक्ते एव गुणे वालंकारे वान्तर्भ
वति नामान्तरकरणेन तु किमिदं पांडित्यम् अथाप्युक्तेषु गुणेष्वलंकारेषु वा नान्तर्भावः तथापि केचिद्विशेषलेशमा
श्रित्य नामान्तरमात्रकरणमुपमाविच्छित्तिप्रकाराणामसंख्येयत्वात् तथापि गुणालंकारव्यतिरिक्ताभाव एव तावन्मात्रे
णा च किं कृतमन्यस्यापि वैचित्र्यस्य शक्योत्स्वदत्ताच्चिरंतनैर्हि भरतमुनिप्रभृतिभिर्यमकोपमे एव शब्दार्थालंकारत्वे
नेष्टे तत्प्रपंचदिक्प्रदर्शनं तन्नैरलंकारै कृतम् तत्र यथा कर्मण्यणित्यत्र कुंभकाराद्युदाहरणे कृत्वा सर्वेण नगर २

कार

काव्यादिशब्दा उत्प्रेक्ष्यन्ते तावता कस्मात्ति बहुमानः एवं प्रकृतेपीति तृतीयः प्रकारः। एवमेकस्मिन्याविकल्पाः त्रयो वह्या।
विति पंच विकल्पा इति तात्पर्यार्थः तानेव क्रमेणाह शब्दार्थपार्थक्येन तावदित्यादिना तावत्तु तेन कस्याप्यत्र न विप्रतिपत्तिरिति
दर्शयति तत्रेति शब्दार्थौ न तावद्ध्वनिः संज्ञामात्रे हि कोशलः अत्र शब्दार्थयोर्यत्स्याच्चारुत्वं स ध्वनिः तथापि हि द्विविधं चारुत्वं स्वरूप
मात्रकृतं चारुत्वं शब्दालंकारेभ्यः संघटनाश्रितं तु शब्दगुणेभ्यः एवमर्थानां चारुत्वं स्वरूपनिष्ठमुपमादिभ्यः संघटनाप
र्यवसितं त्वर्थगुणेभ्य इति न गुणालंकारव्यतिरिक्तो ध्वनिः कश्चित् संघटनाधर्म इति शब्दार्थयोरिति चेत् यद्गुणा
लंकारव्यतिरिक्तं तच्चारुत्वकारि न भवति नित्यानित्यदोषा असाधुदुःश्रवादय इव चारुत्वहेतुश्च ध्वनिस्तस्मान्न तद्व्य
तिरिक्त इति व्यतिरेकी ननु तथापि तद्यच्च यथा गुणालंकारव्यतिरिक्तस्याच्चारुत्वहेतुत्वं तथा न निरूपितद्व्यतिरि
क्तस्य चारुत्वहेतुत्वं संभविष्यतीत्यसिद्धो व्यतिरेक इत्यनेनाभिप्रायेणाह तद्व्यतिरिक्तवृत्तय इति नैव वृत्तिरीतीनां तद्व्य
तिरेकित्वं सिद्धम् तथा ह्यनुप्रासादीनामेव दीप्तमसृणमध्यमवर्णनीयोपयोगितया परुषत्वललितत्वमध्यम
स्वरूपविवेचनाय वर्गत्रयसंपादनार्थं तिस्रोऽनुप्रासजातयो वृत्तय इत्युक्ताः वर्तन्तेऽनुप्रासभेदा आस्विति यदाह सरूप
व्यंजनन्यासं तिसृष्वेतासु वृत्तिषु पृथक् पृथगनुप्रासमुशन्तीति पृथक् पृथगिति परुषानुप्रासः उपनागरिका
नुप्रासः उपनागरिकाललिता नागरिकाया विदग्धयाउपमितेति अत एव वैदग्ध्यविहीनस्वभावसुकुमारा
परुषाग्राम्यावनितासादृश्यादियं वृत्तिर्ग्राम्येति च तृतीयः कोमलानुप्रासः वृत्त्योऽनुप्रासजातय एव न वैदर्भा
षिकवद्वृत्तिर्विवक्षिता येन जातौ जातिमतो वर्तमानत्वं न स्यात् तदनुग्रह एव हि तत्र वर्तमानत्वे यथाह कश्चित्

ध
न्यालो·
५

लोकोत्तरे हि गांभीर्ये वर्तते पृथिवीभुज इति तस्माच्छब्दार्थयोरनुशासनादिभ्यो नातिरिक्तश्शब्दार्थयोर्नाभ्यधिकव्यापारः अतएव
व्यापारभेदाभावादपृथगनुमेयस्वरूपमपीति शब्दार्थस्वव्यापारवाचिनोऽभिप्रायः अनतिरिक्तत्वादेव हि निर्व्यवहारो
भामहादिभिर्न कृतः तद्रुद्रटादिभिः प्रयुक्तोऽपि तस्मिन्नर्थः कश्चिदधिकोऽन्य एष पथमवतीर्ण इत्यभिप्रायेणाह गताः।
श्रवणगोचरमिति निर्वर्तितश्चेति तदनतिरिक्तशब्दार्थयोरपि गताः श्रवणगोचरमिति संबन्धः तदनतिरिक्त इति तच्च हे
नात्र माधुर्यादयो गुणास्तेषां च समुचितवृत्त्यर्पणे यदन्योन्यमेलनक्षमत्वेन पानक इव गुडमरिचादिरसानां संघातरू
पतया गमनं दीप्तललितमध्यमवर्णनीयविषयं गौडीयवैदर्भपाञ्चालदेशहेवाकप्राचुर्यदृशा तदेव त्रिविधं रीतिः।
विश्लक्ष्म जातिर्जातिमतो नान्या समुदायश्च समुदायिभ्यो नान्य इति वृत्तिरीतयो न गुणालंकारव्यतिरिक्ता इति स्थि
तमेवासौ व्यतिरेकी हेतुः तदाह कोऽयं ध्वनिः नैष चारुत्वस्थानं शब्दार्थस्वरूपत्वाभावात् नापि चारुत्वहेतुः गुणालं
कारव्यतिरिक्तत्वादिति तेनाखण्डबुद्धिसमास्वाद्यमपि काव्यमपोद्धारबुद्ध्या यदि विभज्यते तथाप्यत्र ध्वनिश
ब्दवाच्यो न कश्चिदतिरिक्तो लभ्यत इति न्याम शब्देनाह ॥२॥

अलिनामसमर्थेनाह ननु माभूदसौ शब्दार्थस्वभावो मा च भूषाकृत्वहेतुः येन गुणालंकारव्यतिरिक्तोऽसौ न स्यादित्याशंक्य द्वि
तीयमभाववादप्रकारमाह अन्य इति भवत्वेवं तथापि नास्त्येव ध्वनिर्योऽयं त्वया लिलक्षयिषितः काव्यस्यात्मा सौ कश्चिद्व
क्तव्यः नचासौ नृत्तगीतहास्यादिस्थानीयः काव्यस्य कश्चित् कवनीयं काव्यं तस्य भावः काव्यत्वं नचनृत्तादि कवनी

उेऽन्ये ब्रूयुः नास्त्येव ध्वनिः प्रसिद्धप्रस्थानव्यतिरेकिणः काव्यप्रकारस्य काव्यत्वहानेः सह
दयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणं नचोक्तप्रस्थानातिरेकिणो मार्गस्य तत्सं
भवति नच तत्समयान्तःपातिनः सहृदयान्कांश्चित्परिकल्प्य तत्प्रसिद्ध्या ध्वनौ काव्यव्यपदेशः
प्रवर्तितोऽपि सकलविद्वन्मनोग्राहितामवलंबते २॥

यमित्युच्यते प्रसिद्धेति प्रसिद्धं प्रस्थानं शब्दार्थौ गुणा अलंकाराश्चेति प्रतिष्ठन्ते परम्परया विहरन्ति येन मार्गेण तत्प्रस्थानं
काव्यप्रकारस्येति काव्यप्रकारत्वेन सतत्व मार्गोऽभिप्रेतः काव्यस्यात्मत्वेनोक्तत्वात् ननु कस्मात्काव्यं न भवति इत्याह स
हृदयेति मार्गस्येति नृत्तगीतादिप्रवृत्तिनिकोचनादिप्रायस्येत्यर्थः तदिति सहृदयेत्यादिकाव्यलक्षणमित्यर्थः

५=१०

त=७ घा

ध्व०
न्यालो
५
5

ननुयेनाहृशामपूर्वंकाव्यरूपतयाजानंति तएवसहृदयाः तदभिमतत्वेचनामकाव्यलक्षणमुक्तंवनामकाव्यल
क्षणमुक्तं प्रस्थानातिरेकिणएवभविष्यतीत्याशंक्याह नैवेति यथाखल्वहंलक्षणंकरोमीत्यहंकाराभिमानेनविनातत्वाप्रवि
यमाणःसकलदेहाच्छादकःसुकुमारस्थिरतन्तुविचितःसंवर्तननिवर्तनसहिष्णुरच्छेदकःसुच्छेदःतृष्टःखल्वहंइ
तिब्रुवाणःपरैःपटःखल्वेवंविधोभवति नखल्वहंइतिप्रयुक्ततयापर्यनुयुज्यमानएवंब्रूयात् ईदृशएवखल्वहंमामभि
मतइति तादृशोवैतन्न प्रसिद्धंहिलक्ष्यंभवतिनकस्मिंश्चिन्निमित्तेभावः तदाह सकलविद्विदिति विद्वांसोहिनतत्

एव

समयज्ञाभविष्यंतीत्याशंकांसकलशब्देननिराकरोति एवंहिकृतेपिनकिंचित्कृतंस्यादन्यमततापरंप्रकटितेनेति भा
वः एतत्त्वत्राभिप्रायंव्याचष्टेजीवितभूतोध्वनिस्तावत्त्वयाभिमतोजीवितेनवनामप्रसिद्धप्रस्थानातिरिक्तमलंकारका
रैरनुक्तत्वात् तच्छून्यनकाव्यमिति लोकेप्रसिद्धमिति तस्येदंसर्वंस्ववचनविरुद्धं यदिहितत्काव्यस्यानुशासकंते
नांगीकृतंपूर्वपक्षवादिना तच्चिरंतनैरनुक्तमिति प्रत्युतलक्षणंनह्येवभवति तस्मात्स्वाकृतनपवाऽभिप्रायः :

पि

ध्वनि स्वीकर्त्रा

३॥

ननु भवतु सौचारुत्वहेतुः शब्दार्थगुणालंकारान्तर्भूतस्य तथापि ध्वनिरित्यमुया भाषया जीवितमित्यसौ नवेन विडम्ब
इत्यभिप्रायमाशंक्य तृतीयमभाववादमुपन्यस्यति पुनरपरे इति कामनीयकमिति कमनीयस्य कर्म वा रुत्वथीहेतवे

पुनरपरे तस्याभावमन्यथा कथयेयुः न संभवत्येव ध्वनिर्नामापूर्वः कश्चित् कामनीयकम
नतिवर्तमानस्य तस्योक्तेष्वेव चारुत्वहेतुष्वन्तर्भावात् तेषामन्यतमस्यैव वा अपूर्वसमाख्यामात्र
करणे यत् किंचन कथनं स्यात् किं च वाग्विकल्पानामानन्त्यात् संभवत्यपि कस्मिंश्चित् काव्यल
क्षणविधायिभिः प्रसिद्धैरप्रदर्शिते प्रकारलेशे ध्वनिर्ध्वनिरिति यदेतदलीकसहृदयत्वभावना
मुकुलितलोचनैर्नृत्यते तत्र हेतुं न विद्मः सहस्रशो हि महात्मभिरन्यैरलंकारप्रकाराः प्रका
शिताः प्रकाश्यन्ते च न च तेषामेषा दशा श्रूयते तस्मात् प्रवादमात्रं ध्वनिः न त्वस्य क्षोदक्षमं त
त्वं किंचिदपि प्रकाशयितुं शक्यम् तथा चान्येन कृत एवात्र श्लोकः यस्मिन्नस्ति न वस्तु किं
चन मनःप्रह्लादि सालंकृति व्युत्पन्नै रचितं च नैव वचनैर्वक्रोक्तिशून्यं च यत् काव्यं तद्ध्वनिना सम
न्वितमिति प्रीत्या प्रशंसन् जडो नो विद्मोऽभिदधाति किं सुमतिना पृष्टः स्वरूपं ध्वनेः ॥ ४ ॥

तियावत् ननु विच्छित्तीनामसंख्येयत्वात् काचिन्नादृशी विच्छित्तिरस्माभिर्दृष्टा यानानुप्रासादौ नापि माधुर्यादौ उक्तलक्षणेऽन्त
र्भवेत् इत्याशंकाभ्युपगमपूर्वकं परिहरति वाग्विकल्पानामिति वक्तीति वाक् शब्दः उच्यत इति वाक् अर्थः उच्यतेऽनयेति वाक्

२५=२

कर्ता

ध्व॰
न्यालो॰
८
6

अभिधाव्यापारः न च शब्दार्थवैचित्र्यप्रकारो ऽनन्तः अभिधावैचित्र्यप्रकारो ऽप्यसंख्येयः प्रकारलेश इति स हि चारुत्वहेतुर्गुणो
वालंकारो वा सर्वसामान्यलक्षणेन संगृहीत एव यदाह काव्यशोभायाः कर्तारो धर्मा गुणास्तदतिशयहेतवस्त्वलंकाराः
इति ध्वनिर्ध्वनिरिति वीप्सया संभ्रमं सूचयन्नादरं दर्शयति नूनमत इति न लक्षणकृद्भिरस्य मुक्तं काव्यविधायिभिस्तु वर्णनं।
कृतचमत्कारैः यतिप्रभृतिभिरिति शेषः ध्वनिशब्दे को ऽत्यादर इति भावः। प्रवादरूपेति स्वयं दर्पः परैश्च स्तूयमानतेत्यर्थः वा
ग्विकल्पवाक्प्रवृत्तिहेतुप्रतिभाव्यापारप्रकार इति वा तस्मात्प्रवादमात्रमिति सर्वेषामभाववादिनां साधारण उपसंहारः
यतः शोभाहेतुत्वे गुणालंकारेभ्यो न व्यतिरिक्तः यत्त्वव्यतिरिक्तत्वेन शोभाहेतुः यतश्च शोभाहेतुत्वे विनादरास्पदं तस्मा
दित्यर्थः न चेयमभावसंभावना निर्मूलैवहूषितेमाह तथा चान्येनेति ग्रन्थकृत्समानकालभाविनैव मनोरथनाम्ना
कविना यतो न सालंकृति वस्तुनो मनःप्रह्लादि अनेनार्थालंकाराणामभाव उक्तः व्युत्पन्नै रचितं नैव वचनैरिति शब्दालं।
काराणां वक्रोक्तिरुक्तशासंघटना तच्छून्यमिति शब्दार्थगुणानाम् वक्रोक्तिशब्देन सामान्यलक्षणाभावेन सर्वा
लंकाराभाव उक्तः इति केचित् तैः पुनरुक्तं न परिहृतमित्यलम् प्रीत्येति गतानुगतिकानुरागेणेत्यर्थः सुमति
नेति जडेन तद्दोषो भ्रूभंगकटाक्षैरेवोन्नंददत्तत्स्वरूपं काममभावदीनेति भावः एवमेते अभावविकल्पाः स्वे
च्छाक्रमेणागताः न त्वन्योन्यमसम्बद्धा एव तथाहि तृतीयाभावप्रकारनिरूपणोपक्रमे पुनः शब्दस्यायमेवाभिप्रा
यः उपसंहारैकेन संगच्छते अभाववादस्य संभावनाप्राणत्वेन भूतत्वमुक्तम् ४ ॥ ॥

भाक्ततावादस्त्वविशिष्टः । उपलक्षेत्रभिप्रायेण भाक्तमाहुरिति नित्यप्रवृत्तवर्तमानापेक्षया ऽभिधानम् भज्यते सेव्यते पदार्थे
न प्रसिद्धतयोत्प्रेक्ष्यते इति भक्तिः धर्मोऽभिधेयेन सामीप्यादिः ततआगतो भाक्तो लाक्षणिकोऽर्थः यदाहु अभिधेयेन सामीप्यात

ॐ भाक्तमाहुस्तमन्ये अन्ये तं ध्वनिसंज्ञितं काव्यात्मानं गुणवृत्तिरित्याहुः यद्यपि च
ध्वनिशब्दसंकीर्तनेन काव्यलक्षणविधायिभिर्गुणवृत्तिरन्यो वा न कश्चित्प्रकारः प्र
काशितः तथापि गुणवृत्त्या काव्येषु व्यवहारं दर्शयता ध्वनिमार्गो मनाक् स्पृष्टोल
क्ष्यते इति परिकल्प्यैवमुक्तं भाक्तमाहुस्तमन्ये इति ५ ॥ ॥

सामीप्यात्समवायतः वैपरीत्यात्क्रियायोगाल्लक्षणा पंचधा स्मृतेति गुणसमुदायवृत्तेः शब्दस्यार्थभागस्तैक्ष्ण्यादिर्भक्तिः
तत आगतो गौणोऽर्थो भाक्तः भक्तिः प्रतिपाद्ये सामीप्यतैक्ष्ण्यादौ श्रद्धातिशयः तां प्रयोजनत्वेनोद्दिश्य तत आगतो भाक्त इति गौणो ल

ध्व॰
न्यालो
८
१

लाद्वाविकस्य मुख्यस्यार्थस्य भंगो भक्तिरित्येवं मुख्यार्थबाधनिमित्तं प्रयोजनमिति त्रयसद्भाव उपचारबीजमित्युक्तं भव
ति काव्यात्मानं गुणवृत्तिरिति सामानाधिकरण्यस्यायं भावः यद्यप्यविवक्षितवाच्ये ध्वनिभेदे निःश्वासान्ध इवादर्श इत्यादा
वुपचारोऽस्ति तथापि न तदात्मैव ध्वनिस्तद्व्यतिरेकेणापि भावात् विवक्षितान्यपरवाच्यप्रभेदौ तौ विवक्षिते वाच्ये ह्युपचार एव न ध्व
निरिति वक्ष्यामः तथा च वक्ष्यति भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया कस्यचि
द्ध्वनिभेदस्य सा तु स्यादुपलक्षणमिति च गुणाः सामीप्यादयो धर्मास्तैर्लक्षणादयस्तत्तेरूपा येऽर्थान्तरे यस्य तेरूपा येऽ
र्थविशेषस्य यत्र स गुणवृत्तिः शब्दोऽर्थो वा गुणद्वारेण वा वर्तनं गुणवृत्तिरमुख्योऽभिधाव्यापारः एतदुक्तं भवति ध्वनतो
ति वा ध्वन्यत इति वा ध्वननमिति वा यदि ध्वनिस्तथाप्युपचरितशब्दार्थव्यापारातिरिक्तो नासौ कश्चित् मुख्यार्थस्त्वभिधेयैवेति
पारिशेष्यादमुख्य एव ध्वनिस्तृतीयराशिप्रभावात् ननु केनैतदुक्तं ध्वनिर्गुणवृत्तिरिति आशंक्याह यद्यपि चेति अन्यो
वेति गुणालंकारप्रकार इति यावत् दर्शयतेति भट्टोद्भटवामनादिना भामहोक्तं शब्दश्छन्दोऽभिधानार्थ इति अभि।
धानस्य शब्दाद्भेदं व्याख्यातुं भट्टोद्भटो बभाषे शब्दानामभिधानमभिधाव्यापारो मुख्यो गुणवृत्तिश्चेति वामनोऽपि सादृ
श्याल्लक्षणा वक्रोक्तिरिति मनाक् स्पृष्ट इति तैस्तावद्ध्वनिर्दिगुन्मीलिता यथा लिखितपाठकैस्तत्स्वरूपविवेकं क
र्तुमशक्नुवद्भिस्तत्स्वरूपविवेको यतः यस्त्वनोपालभ्यते अभग्ननारिकेलकल्पयथाश्रुतग्रंथोद्ग्रहणमात्रेणेति ।
अनयवाद प्रतिकलैरेवमुक्तमिति यद्येवं न योज्यते तदा ध्वनिमार्गः स्पृष्ट इति पूर्वपक्षाभिधानं विरुध्यते ५ ॥

८

शालीनबुद्धयइति अप्रगल्भमतयइत्यर्थः। एतेचत्रयउन्नतोन्नतभव्यबुद्धयः प्राच्यादिविपर्ययेनैव सर्वथामध्यमात्मन
रूपंजानानाअपिसन्देहेनापह्नुवते अन्यास्त्वनपह्नुवानाअपिलक्षयितुंनजानन्तेइतिक्रमेणविपर्याससन्देहाज्ञानग्रस्ता

केचित्तुनलक्षणकारणशालीनबुद्धयोधनेस्वात्मेतिनामगोचरंमत्पदयत्पदयसंवेद्यमेवसमा
ख्यान्तवंतः तेनैवंविधास्तुविमतिषुस्थितास्तत्पदयमनःशीनयेनतत्स्वरूपंक्रमःतस्यहिध्वनेः
स्वरूपंसकलसत्कविकाव्योपनिषद्भूतमतिरमणीयमणीयसीभिरपिचिरंतनकाव्यलक्षण।
विधायिनांबुद्धिभिरनुन्मीलितपूर्वम् अथचरामायणमहाभारतप्रभृतिनिलक्ष्येसर्वत्रप्रसिद्ध।
व्यवहारंलक्षयतांसहृदयानामानन्दोमनसिलभतांप्रतिष्ठामितिप्रकाश्यते १ ॥ ॥

मि = २

त्वमेषांतेनेतिएकेकोप्ययंविशतिपञ्चरूपोवाक्यार्थोनिरूपणेहेतुत्वंप्रतिपद्यते इत्येकवचनम् एवंविधास्तुविमतिष्विति ॥

ध्व.
न्यालो.
८
8

निर्धारणे सप्तमी। समस्तेष्वेकोपि यो विमतिप्रकारस्तेनैव हेतुना तत्स्वरूपं ब्रूम इति ध्वनिस्वरूपमभिधेयम्। अभिधाना
भिधेयलक्षणो ध्वनिशास्त्रयोर्वक्तृश्रोत्रोर्व्युत्पाद्यव्युत्पादकभावः संबन्धो विमतिनिरासेन तत्स्वरूपज्ञानं प्रयोजनम्। शा
स्त्रप्रयोजनयोः साध्यसाधनभावः संबन्धः। अथ विशेषप्रयोजनं प्रतिपादयितुं सहृदयमनःप्रीतये इति भागं व्याख्यातुमाह। त
स्याहीति। किमिति पदयति तस्येत्यर्थः। ध्वनेः स्वरूपं लक्षयतोस्य संबन्धिनि मनसि हृदये आनन्दो निर्वृत्यात्मा चमत्कारापरपर्याय
प्रतिष्ठां परैर्विपर्यासादिपरैरवलम्ब्यमानत्वेनस्थ्यमानं लभतामिति प्रयोजनं संपादयितुं तत्स्वरूपं प्रकाश्यते इति संग
तिः। प्रयोजनं च नाम तत्संपादकवस्तुप्रयोक्तृताप्राणतयैव तथा भवतीत्याशयेन प्रीतये तत्स्वरूपं ब्रूम इत्येकवाक्यता
व्याख्याने तत्स्वरूपशब्दं व्याचष्टे: संक्षेपेणेति। तावता पूर्वोदितविकल्पपंचकोद्धरणं प्रथयति सकलेत्यादिना। सक
लशब्देन सतत्कविशब्देन च प्रकारलेशे कस्मिंश्चिदपि निराकरोति अनिरूपणीयमिति भाक्ताद्व्यतिरेकमाह न हि सिंह
वटुगं गणयांचोपरस्य तत्रापि ना काचित्। उपनिबद्धं न शब्देन तु प्रसूर्वसमाख्यामात्रकरणेत्यादिना शङ्कितम्। अणीय
सीभिरित्यादिना गुणालंकारानन्तर्भूतत्वं सूचयति। अथ चेत्यादिना तत्समयान्तःपातिन इत्यादिना यत्सामयिकत्वं।
शंकितं तन्निरवकाशीकरोति। रामायणभारतशब्देनादिकवेः प्रभृति सर्वैरेव मुनिभिरस्वादद् इति दर्शयति। लक्षयतामि
त्यनेन वाचां स्थितमविषय इति परास्यति। लक्ष्यतेनेन तत्त्वो लक्षणम्। तद्वेण निरूपयन्ति तेषां लक्षणद्वारेण निरूप
यतामित्यर्थः। सहृदयानामिति येषां काव्यानुशीलनाभ्यासवशाद्विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्य
ता ते हृदयसंवादभाजः सहृदयाः। यथोक्तम्। योर्थो हृदयसंवादभाजः सहृदयाः। यथोक्तम्। योर्थो हृदयसंवादीन

शरीरं व्याप्नोतीत्येतेन शुष्कं काष्ठमिवाग्निरिति आनन्द इति रसस्य चर्वणात्मनः प्राधान्यं दर्शयन्रसध्वनेरेव सर्वत्र मुख्यभूततामात्मत्वमि
ति दर्शयति तेन यदुक्तं ध्वनिर्नामापरो योऽपि व्यापारो व्यञ्जनात्मकः तस्य सिद्धेऽपि भेदे स्यात्काव्यांशत्वं न तु रूपितेति तदपहस्तितं भव
ति तथा ह्यभिधाभावनारसचर्वणात्मकेऽपि त्र्यंशे काव्ये रसचर्वणा तावज्जीवितभूतेति भवतोऽप्यविवादोऽस्ति यथोक्तं त्वयैव का।
व्ये रसयिता सर्वो न बोद्धा न नियोगभागिति तदहं त्वलंकारध्वमभिप्रायेणांशमात्रत्वमिति सिद्धसाधनम् रसध्वन्यभिप्राये।
ण तु स्वाभ्युपगमप्रसिद्धिसंवेदनविरुद्धमिति तत्र कवेस्तावत्कीर्त्यापि प्रीतिरेव संपाद्या यदाह कीर्तिः स्वर्गफलमाहु
रित्यादौ श्रोतॄणां च व्युत्पत्तिप्रीती यद्यप्यस्ति यथोक्तं धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च करोति कीर्तिं प्रीतिं च
साधुकाव्यनिबन्धनमिति तथापि तत्र प्रीतिरेव प्रधानम् अन्यथा प्रभुसंमितेभ्यो वेदादिभ्यो मित्रसंमितेभ्यश्चे
तिहासादिभ्यो व्युत्पत्तिहेतुभ्यः कोऽस्य काव्यरूपस्य व्युत्पत्तिहेतोर्जायासंमितत्वलक्षणो विशेष इति प्राधान्येनानन्द
एवोक्तः चतुर्वर्गव्युत्पत्तेरपि चानन्द एव पार्यन्तिकं मुख्यं फलम् आनन्द इति च ग्रन्थकृतो नाम तेन स च आनन्दवर्ध
नाचार्य एतच्छास्त्रद्वारेण सहृदयेषु प्रतिष्ठां देवतायतनादिवदनश्वरीं सिद्धिं गच्छत्विति भावः यथोक्तम् उ
पेयुषामपि दिवं सन्निबन्धविधायिनाम् आस्त एव निरातङ्कं कान्तं काव्यमयं वपुरिति ॥ तथा मनसि प्रतिष्ठामि
ति एवंविधस्य मनसः सहृदयचक्रवर्तीत्वलब्धयं ग्रन्थकृदिति यावत् यथा गुरुः प्रतिष्ठापरमार्जनस्येति स्वनाम प्रक
टीकरणं श्रोतॄणां प्रह्वत्वंगमेव संभावनाप्रत्ययोत्पादनमुखेनेति ग्रन्थान्ते वक्ष्यामः एवं ग्रन्थकृतः कवेः श्रोतृश्च
मुख्यं प्रयोजनमुक्तम् ८ ॥ ॥ ॥ ॥

ध्व॰
न्यालो
५
१

तत्रेति एवंभूतेऽस्मिन्विषये प्रयोजने च स्थिते इत्यर्थः ननु ध्वनिस्वरूपं वक्तव्यमिति प्रतिज्ञाय वाच्यप्रतीयमानाख्यौ द्वौ भेदावर्थस्येति वाच्या
भिधाने का संगतिः कारिकाया इत्याशंक्य संगतिं कर्तुमवतारणिकां करोति ध्वनेरेवेत्यादिना भूमिरेव भूमिका यथा रूपं निर्मीलि
विकीर्षितं एवं भूमिरेव विरच्यते तथा ध्वनिस्वरूपे प्रतीयमानाख्ये निरूपयितव्ये निर्विवादसिद्धवाच्याभिधानं भूमित्वेन
पिकप्रतीयमानांशोल्लिङ्गनाय वाच्येन समशीर्षिकागणनं तस्याप्यनपह्नवनीयत्वं प्रतिपादयितुं स्मृतावित्यनेन ॥

ॐ तत्र पुनर्ध्वनेरेव लक्षयितुमारब्धस्य भूमिकां रचयितुमिदमुच्यते योऽर्थः सहृद
यश्लाघ्यः काव्यात्मा यो व्यवस्थितः वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ
॥ काव्यस्य हि ललितोचितसन्निवेशचारुणः शरीरस्येवात्मा साररूपतया स्थि
तः सहृदयश्लाघ्यो योऽर्थस्तस्य वाच्यः प्रतीयमानश्चेति द्वौ भेदौ ७ ॥ ॥

यः समाम्नातपूर्व इति शेषयति ॥ ॥ ५

पाह्यार्थशरीरं काव्यमिति यदुक्तं तत्र शरीरग्रहणादेव केनचिदात्मना तदनुप्राणकेन भाव्यमेव तत्र शब्दस्तावच्छरीरभाग
एव सन्निविशते सर्वजनसंवेद्यधर्मत्वात् स्थूलकृशत्वादिवत् अर्थः पुनः सकलजनसंवेद्यो न भवति न ह्यर्थमात्रेण काव्यव्य
पदेशो लौकिकवैदिकवाक्येषु तदभावात् तदाह सहृदयश्लाघ्य इति स एक एवार्थो द्विशाखतया विवेकिभिर्विभागबुद्ध्या
विभज्यते तथा हि तुल्येऽर्थरूपत्वे किमिति कस्मैचित्सहृदयाः श्लाघन्ते तद्भवितव्यं केनचिद्विशेषेण यो विशेषः स प्रतीय
मानभागो विवेकिभिर्विशेषहेतुत्वादात्मेति व्यवस्थाप्यते वाच्यसंकलनाविमोहितहृदयैस्तु तत्पृथग्भावो विप्रतिपद्य
ते चार्वाकैरिवात्मपृथग्भावः अत एवार्थ इत्येकतयोपक्रम्य सहृदयश्लाघ्य इति विशेषणद्वारा हेतुमभिधायापोद्धार
दृष्ट्या तस्य द्वौ भेदौ अंशावित्युक्तं न तु द्वावप्यात्मानौ काव्यस्येति कारिकाभागगतं काव्यशब्दं व्याकर्तुमाह काव्य
स्य हीति ललितशब्देन गुणालंकारग्रहणमाह उचितशब्देन रसविषयमेवौचित्यं भवतीति दर्शयन् रसध्वनेर्जीवि
तत्वं सूचयति तदभावे हि किमपेक्षयेदमौचित्यं नाम सर्वत्रोद्घोष्यत इति भावः यो ऽर्थ इतीयता अनुवदन्परेणाप्य
तत्तावदुपगतमिति दर्शयति तस्येत्यादिना तदभ्युपगमपूर्वकं ह्यंशत्वेऽस्य नुपपद्यत इति दर्शयति तेन यदुक्तं चारु
त्वहेतुत्वाद्धेतुरसिद्ध इति दर्शितम् तथात्मा चारुत्वहेतुर्देहस्येति भवति अथाप्येवं स्यात्तथापि वाच्येनानैकान्ति
को हेतुः तथालंकार्य एवालंकारो गुणी एव गुणाः तदर्थमपि वाच्यांशोपक्षेपः अत एव च वक्ष्यति वाच्यः प्रसिद्ध
इति ॥ २॥

त्वाद्गुणालंकारव्यतिरिक्तो न ध्वनि०। इति तत्र ध्वने
रात्मस्वरूप =

ध्व॰
न्यालो
१०

नत्वेतिह्यशत्वेसत्यपीत्यर्थः प्रसिद्धइतिवनितावदनोद्यानेन्दूदयादिर्लौकिकएवेत्यर्थः उपमादिभिः प्रकारैः स

ऽतत्रवाच्यः प्रसिद्धोयः प्रकारैरुपमादिभिः बहुधाव्याकृतः
सोऽन्यैः काव्यलक्ष्मविधायिभिः ततोनेहप्रतन्यते केवल
मनूद्यतेयथोपयोगमिति ८ ॥ ॥

व्याकृतोबहुधेतिसंगतिः अन्यैरितिकारिकाभागंकाव्येत्यादिनाचष्टे। ततोनेहप्रतन्यतइति विशेषप्रतिषेधेनशेषाभ्यनुज्ञेति
दर्शयति केवलमित्यादिना ० ॥

१०

पुनःशब्दो वाच्याद्विशेषद्योतकः। अन्यदेवेति तद्व्यतिरिक्तं सारभूतमित्यर्थः। महाकवीनामिति बहुवचनमशेषवि
षयव्यापकत्वमाह। एतदभिधास्यमानप्रतीयमानानुप्राणितकाव्यनिर्माणनिपुणप्रतिभाभाजनत्वेनैव महाकविव्यप
देशो भवतीति भावः। यदेवंविधमस्ति तद्भाति न ह्यसतो भानमुपपन्नं रजताद्यपि नास्त्यं तमसद्भाति अनेन सत्त्वप्रयुक्तं ता
वद्भानमिति भासनात्सत्त्वमवगम्यते तेन यद्भाति तदस्ति न त्वेतस्त्वं भवति तेनायं प्रयोगार्थः। प्रसिद्धं वाच्यं यमिप्रतीयमा
नेन व्यतिरिक्तेन तदृश्यभासमानत्वाल्लावण्यापेक्षतांगनागवत्। प्रसिद्धशब्दस्य शब्दप्रतीतत्वमलंकृतत्वं चार्थः। यत्तद्दितिसर्वे

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनां। यत्तत्प्रसिद्धावयवातिरिक्तमाभाति ला
वण्यमिवांगनासु॥ महाकवीनां वाणीषु प्रतीयमानं तु वस्त्व वाच्यार्थादन्यदेवास्ति यत्तत्सहृदे
यसुप्रसिद्धं प्रसिद्धेभ्योलंकृतेभ्यः प्रतीतेभ्यो वावयवेभ्यो व्यतिरिक्तत्वेन प्रकाशते लावण्यमिवा
गनासु। यथा ह्यंगनासु लावण्यं पृथङ्निर्वर्ण्यमानं निखिलावयवव्यतिरेकि किमप्यन्यदेव स
हृदयलोचनामृतं तत्त्वान्तरं तद्वदेव सोऽर्थः। स ह्यर्थो वाच्यसामर्थ्याक्षिप्तं वस्तुमात्रमलंका

नामसमुदायस्य चमत्कारेणाप्रकटीकरणार्थमव्यपदेश्यत्वमस्योक्तं सैव ललनाकृतं वा व्यतिरेकप्रमेदृष्टान्तदार्ष्टान्तिकयोर्दर्शयति प
तस्य किमपीत्यादिना व्याचष्टे लावण्यं हि नामावयवसंस्थानाभिव्यंग्यमवयवव्यतिरिक्तं धर्मान्तरमेव न चावयवानामेव निर्दोषता
वा भूषणयोगो वा लावण्यं पृथङ्निर्वर्ण्यमानकाणत्वादिदोषशून्यशरीरावयवयोगिन्यामप्यलंकृतायामपि कस्यांचिल्लावण्यामृत
वं हि केयमिति सहृदयानां व्यवहारात्। ननु लावण्यं तावद्व्यतिरिक्तं प्रथितं प्रतीयमाने किं तदित्येव न जानीमः इत्याह इत्यत्र व्यतिरे
कप्रथेति न तथाभासमानत्वमप्रसिद्धाहेतुरित्याशंक्य सत्त्वार्थः स्यादिना स्वरूपं तस्याभिधत्ते सर्वेषु चैव स्यादिना व्यतिरेकप्रथां सा यथापि

= २ =

ध्व

तार=५

लावण्यशून्येयमित्यतथाभूतायामपि=

ध्व-
न्यालो-
११
॥

तत्रप्रतीयमानस्य तावद्द्वौ भेदौ लौकिकः काव्यव्यापारैकगोचरश्चेति लौकिको यः स्वशब्दवाच्यतां कदाचिदधिशेते स च विधि
निषेधाद्यनेकप्रकारो वस्तुशब्देनोच्यते सोऽपि द्विविधः यः पूर्वं क्वापि वाक्यार्थेऽलंकारभावमुपमादिरूपतयान्वभूदिदानीं त्व
नलंकाररूप एवान्यत्र गुणीभावाभावात्स पूर्वप्रत्यभिज्ञानबलादलंकारध्वनिरिति व्यपदिश्यते ब्राह्मणश्रमणन्यायेन तद्रू
पाभावेन तूपलक्षितं वस्तुमात्रमुच्यते मात्रग्रहणेन हि रूपान्तरं निराकृतम् यस्तु स्वप्नेऽपि न स्वशब्दवाच्यो न लौकिक
व्यवहारपतितः किंतु शब्दसमर्प्यमाणहृदयसंवादसुन्दरविभावानुभावसमुचितप्राग्विनिविष्टरत्यादिवासनानुराग

भेदेष्वेव तेषु प्रकारेषु तस्य वाच्यादन्यत्वं तथा ह्याद्यस्तावत्प्रभेदो वाच्याद्दूरं विभेदवान् स हि क
दाचिद्वाच्ये विधिरूपे प्रतिषेधरूपः यथा

भ्र म धा र्मि क वि स्र ब्धः स शु न को ऽद्य मा रि तः
भम धम्मिअ वीसत्थो सो सुणओ अज्ज मारिओ तेण
ते न गो दा व री कू ल ल ता ग ह न वा सि ना दृ प्त सिं हे न
गोलाणइकच्छकुडंगवासिणा दरिअसीहेण ४ ॥

सुकुमारस्वसंविदानन्दचर्वणाव्यापाररसनीयरूपो रसः स काव्यव्यापारैकगोचरो रसध्वनिरिति स च ध्वनिरेवेति स एव मुख्यतयात्म
यात्मेति यद्वक्ष्यते भट्टनायकेन त्र्यंशत्वेन रूपितेति तद्वस्त्वलंकारध्वन्योरेव यदि नाम मोघा लंभो रसध्वनिस्तु तेनैवात्मतया गीक
तो रसचर्वणात्मनः तृतीयस्यांशस्याभिधाभावनांशद्वयोत्तीर्णत्वेन निर्णयाद्वस्त्वलंकारध्वन्योः रसध्वनिपर्यन्तत्वमेवेति
वयमेव वक्ष्यामः न चैते भ्यस्तावत् वाच्यसामर्थ्याक्षिप्तमिति निभेदत्रये व्यापकं सामान्यलक्षणं यद्यपि ध्वननं शब्दस्यैव
व्यापारस्तथाप्यर्थसामर्थ्यस्य सहकारित्वात्सर्वत्रापि वाच्यसामर्थ्याक्षिप्तमुक्तम् ॥

११

तैचैत्यास्ताता

शब्दशक्तिमूलानुरणनव्यंग्येऽप्यर्थसामर्थ्यात्प्रतीयमानावगतिः शब्दशक्तिः केवलमवान्तरकारणमिति निवस्यामः इयं विभेद
वानिति विधिनिषेधौ विरुद्धाविति द्विनकस्य विदपि विमतिः एतदर्थं प्रथमं तावदुदाहरति भम धम्मिअ इति ॥ भ्रम धा
र्मिक विश्रब्धः स श्वाऽद्य मारितस्तेन गोदावरीकूललतागहनवासिना दृप्तसिंहेन कस्याश्चित्संकेतस्थानं जीवितस
र्वस्वायमानं धार्मिकसंचरणान्तरायदोषात्तद्दवलुप्यमानं पल्लवकुसुमादिविच्छायीकरणाच्च परित्रातुमियमुक्तिः तत्र स्वतः सि
द्धमपि भ्रमणं श्वभयेनापोदितमिति निशतिश सवान्मको निषेधाभावरूपो न तु नियोगप्रेषादिरूपो ह्यविधिरिति सर्गे ग्रामकालयोर्लिङ्
लोट् तत्र भावतत्त्वावयोर्विरोधाद्द्वयोरप्यभावात् न युगपद्वाच्यता न क्रमेणाविरम्य व्यापारद्वयाभावात् विशेषं नाभिधा गच्छ
ति स्यादिनाभिधाव्यापारस्य विरम्यासंभवाभिधानात् ननु तात्पर्यशक्तिरपर्यवसिता नाविवक्षया हसधार्मिकतदादिपदार्था
न्वयरूपमुख्यार्थबाधकबलेन विरोधनिमित्तया विपरीतलक्षणया च वाक्यार्थीभूतनिषेधप्रतीतिरभिहितान्वयदृशाक
वोतीति शब्दमूल एवे सार्थः एवमनेनोक्तमिति द्विव्यवहारः नत्र वाच्यातिरिक्तो व्यङ्ग्योऽर्थ इति नैतत् त्रयो ह्यत्र व्या
पाराः संवेद्यन्ते पदार्थेषु सामान्यात्मस्वभिधाव्यापारः समयापेक्षार्थावगमनशक्तिर्ह्यभिधा समयश्च तावत्येव
न विशेषांशे आनन्त्याद्व्यभिचाराच्चैकस्य ततो विशेषरूपे वाक्यार्थे तात्पर्यशक्तिः परस्परान्विते सामान्यान्यथासि
द्धेर्विशेषं गमयन्तीति हि दृष्टनियायात् तत्र च द्वितीयकक्ष्यायां भ्रमेति विध्यतिरिक्तं न किंचित्प्रतीयते अन्वयमात्रस्यैव प्रति
पन्नत्वात् न हि गंगायां घोषः सिंहो वटुरित्यत्र यथान्वय एव बुभूषन्प्रतिहन्यते योग्यताविरहात्तथा तत्र भ्रमणनि
षेद्धा सत्त्वाऽसिंहेन हतः तदिदानीं भ्रमणनिषेधकारणवैकल्याद् भ्रमणं तवोचितमित्यत्रान्वयस्य न काचिद्धतिः

ध०
न्यालो
१२
12

अतएवमुख्यार्थबाधानात्रशंकेतिनविपरीतलक्षणाप्रवसरः भवतुवासौनथापिद्वितीयस्थानसंक्रान्ताभावादसौनभ
वति तथाहि मुख्यार्थबाधायांलक्षणाप्रवृत्तिः साचविरोधप्रतीतिरेव नचात्रपदार्थानांस्वात्मनिविरोधः परस्परंविरोध
इतिचेत्सोयंतर्ह्यन्वयेविरोधःप्रसेयः नचाप्रतिपन्नेन्वयेविरोधप्रतीतिः प्रतिपत्तिश्चान्वयस्यनाभिधाशक्त्या तस्याःपदार्थप्र
तिपत्त्युपक्षीणायाविरम्यव्यापारादिति नान्यथाशक्त्यैवान्वयप्रतिपत्तिः नन्वेवमंगुल्यग्रेकरिवरशतमिति अत्राप्यन्वय
प्रतीतिःस्यात् किंनभवत्यन्वयप्रतीतिर्दशदाडिमादिवाक्यवत् किंतुप्रमाणान्तरेणसोन्वयःप्रत्यक्षादिनाबाधितः
प्रतिपन्नोपिशुक्तिकायांरजतमिवेतितद्वदगमकाविरोधवाक्यस्याप्रामाण्यम् सिंहोमाणवकइत्यत्रद्वितीयकक्षानिवि
ष्टतात्पर्यशक्तिःसमर्पितान्वयबाधकोल्लासानन्तरमभिधातात्पर्यशक्तिद्वयव्यतिरिक्तानावतृतीयैवशक्तिःसलक्षणक — शक्ति
विधुरीकरणनिपुणात्वलक्षणाभिधानासमनुरहमतिनन्वेवंसिंहोवटुरित्यत्रापिकाव्यरूपतास्यात् ध्वननलक्षणस्यात्मनो
ऽत्रापिसमनन्तरमेववक्ष्यमाणतयाभावात् ननुघटेपिजीवव्यवहारःस्यादात्मनोविभुत्वेनतत्रापिभावात् शरीरस्य
त्वत्तुविशिष्टाधिष्ठानयुक्तस्यसत्यात्मनिजीवव्यवहारोनघटस्यकस्यचिदितिचेद्गुणालंकारौचित्यसुन्दरशब्दा
र्थशरीरस्यसतिध्वननात्मन्यात्मनिकाव्यरूपताव्यवहारोनचात्मनोसारताकाविदितिसमानं नचैवंभक्तिरेवध
निः भक्तिर्हिलक्षणाव्यापारस्तृतीयकक्ष्यानिवेशी चतुर्थ्यांतुकक्ष्यायांध्वननव्यापारः तथाहि त्रितयसन्निधौलक्ष
णाप्रवर्ततेइतिताबद्भवंतएवप्रतिजानते तत्रमुख्यार्थबाधातावत्प्रत्यक्षादिप्रमाणान्तरमूलानिमित्तंचयदभिधीयते
सामीप्यादि तदपिप्रमाणान्तरावगम्यमेव यत्त्विदंचोद्यस्यातिपवित्रत्वशीतलत्वसेव्यत्वादिकमप्रयोजनंवाच्यंप्रमाण

तदाप्रतिपन्नेव घटो वीपराक्रमातिशयपरालक्षितत्वं तत्र शब्दस्य तावन्न व्यापारः तथा हि तत्सामीप्यात्तद्धर्मत्वानुमानमनैका
न्तिकम् सिंहशब्दवाच्यत्वं च वटोरसिद्धम् अथ यत्र यत्रैव शब्दप्रयोगस्तत्र तत्र तद्धर्मयोग इत्यनुमानान्तरं कथं तथापि व्याप्ति
ग्रहणकाले मौलिकं प्रमाणान्तरं च नास्ति न च स्मृतिरियं अननुभूतेः तद्योगात्रियमाप्रतिपन्नेवं क्वचिदेवं विवक्षितमित्यर्थस्य वा सा
ध्याभावप्रसंगाच्च न त्वस्मिन्नावदत्र शब्दस्य व्यापारो व्यापारश्च नाभिधात्मा समयाभावात् न तात्पर्यात्मा तस्यान्वयप्रतीतावेव परिक्ष
यात् न लक्षणात्मा उक्तादेव हेतोः स्खलितगतित्वाभावात् तत्रापि हि स्खलद्गतित्वे पुनर्मुख्यार्थबाधानिमित्तं प्रयोजनमित्यनव।
स्थास्यात् अत एव वयं केनचिल्लक्षितलक्षणेति नाम कृतं तद्व्यसनमात्रम् तस्मादभिधातात्पर्यलक्षणाव्यतिरिक्तश्चतुर्थोसौ व्या
पारो ध्वननद्योतनव्यंजनप्रत्यायनावगमनादिसोदरव्यपदेशनिरूपितोभ्युपगंतव्यो यद्वक्ष्यति मुख्यां वृत्तिं परित्यज्य गुणवृ
त्त्यार्थदर्शनम् यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिरिति तेन समयापेक्षा वाच्यावगमनशक्तिरभिधाशक्तिः तदन्यथा
नुपपत्तिसहायार्थावबोधनशक्तिस्तात्पर्यशक्तिः मुख्यार्थबाधादिसहकार्यपेक्षार्थप्रतिभासनशक्तिर्लक्षणाशक्तिः तच्छ
क्तित्रयोपजनितार्थावगममूलजाततत्प्रतिभासपवित्रितप्रतिपत्तृप्रतिभासहायार्थद्योतनशक्तिर्ध्वननव्यापारः स च प्राग्
वृत्तं व्यापारत्रयं न्यक्कुर्वन्प्रधानभूत एव काव्यात्मेत्याशयेन निषेधप्रतिमुखतया वप्रयोजनविषयोपि निषेधविषय इत्यु
क्तः अभ्युपगममात्रेणैवेत्युक्तं न तत्र लक्षणात्मना तिरस्कारात्मसंक्रमणयोरभावात् तात्पर्यशक्तिमूलस्य व्यापारः
सहकारिभेदाच्च शक्तिभेदः स्पष्ट एव यथा तस्यैव शब्दस्य व्याप्तिस्मृत्यादिसहकृतस्य विवक्षावगतावनुमापकव्यापारः
श्रद्धादिसहकृतस्य वाचिकस्य तत्त्वव्यापारः श्रद्धादिसहकृतस्य वाचिकस्य तत्त्वव्यापारः एवमभिहितान्वयवादिनां ताव

वगमरय्वमूलं तेनजाता
त

चि त्रि

प्र.
न्यासो.
१३

द्विपदनपह्नवनीयम् योप्यन्विताभिधानवादी तस्य च शाब्दः सर्वाह्यार्थ इति पदेभ्यः शृद्धीन्वा शब्दवदभिधाव्यापारमेव दीर्घ
मिच्छति तस्य च दीर्घदीर्घो व्यापारस्तदेकोऽसाविति कृत्वाभिन्नविषयत्वात् प्रधानेकोऽसौ न हि व्यसहकारिभेदादस
जातीय एव युक्तः सजातीये च विरम्य व्यापारः शब्दकर्मबुद्ध्यादीनां पदार्थविद्भिर्निषिद्धः असजातीये वा स तत्र एव अ
पयोरसौ च नर्थकल्पनादिविशिष्टोऽर्थः स इति कृतिति वाक्येनाभिधीयते इत्येवं विषंदीर्घदीर्घत्वं विवक्षितम् न तु तर्हि सं
केताकरणात्कथं साक्षात्प्रतिपत्तिः निमित्ते च संकेतो नैमित्तिकत्वस्यार्थ इति संकेतानपेक्षणं वेति चोत्पाद्यश्रोत्रिय
स्याक्षिकौशलम् योऽसौ पर्यनकस्वाभाव्यर्थः प्रथमं प्रतीतिविषयमवतीर्णस्तस्य पश्चात्तनाः पदार्था निमित्तभावं गच्छ
न्तीति नूनं मीमांसकस्य प्रत्येतुं शक्तिनैमित्तिकत्वमभिमतम् प्रथाप्यते पूर्वं तत्र संकेतनग्रहणं संस्कृतस्य तत्प्राधान्येऽपि विभव
तीत्यनुयावत्स्थित्या निमित्तत्वं पदार्थानां तर्हि तदनुसारानुपयोगेन न किंचिदयुक्तं स्यात्तत्रापि प्राकृदार्थे च संबंध
ग्रहणे हेतुत्वं अन्विताभिमेवसदाग्रयोगात् अवापोद्धापाभ्यां तथाभाव इति चेत् संकेतः। पदार्थमात्र एव तु यमोप्या
स्यात्स्येव विशेषप्रतीतिः प्रथाप्यते दृष्टेव कृतितानस्य ऐशतिपत्तिः किमत्र क्रम इति तर्हि दं वयमपि नागीकुर्मो
यदह्यामः नहस्तवेतमांसोऽर्थो वा व्याख्यो विभुत्वोन्मनाम् बुद्धेर्न तत्रावभासिन्याः कृतिरिवावभासने इति किं
न सातिशयानवशीलनादाप्रसातत्र संभाव्यमानोऽपि क्रमः सजातीय तर्हि कस्य परम्परानुदयादस्यस्तविषयव्यातिसि
मयस्तितिक्रमवत्तत्सवेद्य न इति निमित्तनैमित्तिकभावाश्वावप्रयत्नशीलता अन्यथा गौणलाक्षणिकयोर्मुख्याद्भेदः कृतिलिं
गादिप्रमाणषट्कस्य परस्परं विस्वामित्र्यादिष्वक्रियाविधानो निमित्तनावेवविशेषो वास्याः सामर्थ्यान्निमित्तनावे विश्लेषवान्भ्युपगम्येते किम्

१३

तैरप्यविद्यापदपतितैः सर्वैरियमनुसरणीया प्रक्रिया तदुत्तीर्णत्वे तु सर्वं परमेश्वराद्वयं ब्रह्मेत्यस्मच्छास्त्रानुसारेण विदितं
तंत्रालोकग्रन्थे विचारयिष्यते इत्यास्ताम्। यत्तु भट्टनायकेनोक्तं मिद्दृप्तसिंहादिपदयोगेपि धार्मिकपदप्रयोगे च भयानकरसावेशकृतै
व निषेधावगतिस्तदीयभीरुधीरत्वकृतेति नियमावगममन्तरेणोक्तान्ते नानिषेधगत्यभावादिति तन्न केवलार्थसामर्थ्यान्निषेधग
तेर्निमित्तमिति तत्रोच्यते केनोक्तमेतदत्र प्रतिपत्तृविशेषावगमविरहेण शब्दगतध्वननव्यापारविरहेण च निषेधावगतिरिति
प्रतिपत्तृवक्तृप्रतिभासहकारित्वं ह्यस्माभिर्द्योतनस्य प्राणत्वेनोक्तम्। भयानकरसावेशश्च न वर्ण्यस्य भयमात्रोत्पत्तिमात्रात् प्रति
पत्तुश्च रसावेशो रसाभिव्यक्त्यैव रसस्य च शब्दवाच्यत्वं तेनापि नोपगतमिति व्यंग्यत्वमेव प्रतिपत्तुरपि रसावेशो नियतः न ह्य
सौ नियमेन भीरुधार्मिकस्य सब्रह्मचारिहृदय एव अपि तु हि शोभापि सहकारी कल्प्यते तर्हि वक्तृप्रतिपत्तृप्रतिभाप्रा
णितो ध्वननव्यापारः किं न सह्यते किं च वक्तृध्वनिं हृदयतारसस्य ध्वनिस्तदनुग्राहकः समर्थ्यत इति सहृदयवंद्यनिषेधोसा
यं। यदाहुः कोपोपि देवस्य वरेण तुल्य इति। अथ रसस्यैव यत्राशाधान्यमुक्तं तत्को न सहते अथ वस्तुमात्रध्वनेरेव तदुदाहर
णं स्तुतमित्युच्यते तथापि कार्योदाहरणबाहुल्यं च अथ नीलाको दोषः यदि न रसानुवेधेन विना न तुष्यते तद्भ
यानकरसानुवेधो विनात्र सत्यः प्रत्यर्पणमपास्तेन अपितु कनीत्या संभोगाभिलाषविभावसंकेतस्थानोचितविवि
पिष्टकाङ्क्षाद्यनुभावसंवलनोचितशृङ्गाररसानुवेधोस्स्वलौकिकत्वान्नावश्यमात्रादेव वाच्यान्वगमात्स्वयमेनिर्वि
वादसिद्धविविक्तविधिनिषेधप्रदर्शनाभिप्रायेणैवैतदुदाहरणं दत्तम्। यत्तु ध्वनिव्याख्यानोद्यतस्तात्पर्य
शक्तिमेव विवक्षासूचकत्वमेव वा ध्वननमवोचत्स नास्माकं हृदयमावर्जयति यदाहुः भिन्नरुचिर्हि लोक इति

ध्यो = ५

निष्कासनेन

पुरा दृप्तत्वाभावदशायां सिंहस्य कथंचित्ततो देशान्निर्गमनं संभावितं सिंहस्य निर्बलत्वात् अधुना तु तस्य दृप्ततया निर्गमनं सर्वथाऽसंभावितमितिभावः

तदेतदग्रेयथायथंप्रतनिष्यामइत्यास्तांतावत् भ्रमेतिभ्रतिसृष्टोपिशापसेभ्रमणकालः धार्मिकेतिअस्त्रमाधुपयोगार्थंयुक्तं तेभ्रमणम् विस्रब्धइति शंकाकारणवैकल्यात् सइतियस्तेभयप्रकम्पामंगलतिकामकृत अद्येति दृप्तावर्धसेइत्यर्थः माविततइति पुनरस्याःकुत्स्यातं तेनेतिपः पूर्वंकर्णोपकर्णिकयात्वयाप्याकर्णितो गोदावरीकच्छगहने प्रतिवसतीतिसर्वमेवह्नित इत्यर्थेयतत्रयामेप्याविनोसावधुनातु दृप्तत्वात्तद्गोगहनान्निःसरतीतिप्रसिद्धगोदावरीपरिसरानुसरणमपितावत्कथाशेषीभूतेकाकथानद्यानागहनप्रवेशशंकायाइतिभावः ॥ ५ ॥

आवयोरित्यर्थे प्रसङ्गात् अतएव महस्स

श्वश्रूरत्र शेते अथवा निमज्जति अत्राहं दिवसकं प्रलोकय मापथिक रात्र्यंध शय्यायामावयोर्माङ्क्षी: शायिष्ठा वा मा इति लिपा।
तो नेकार्थेऽह निरत्रैन न मा मेति (त्यर्थे) एवं हि निषेधवचनमेव प्रांकाकारिभवेदिति प्रच्छन्नाभ्युपगमो न स्यात् कश्चित्प्रोषितप
तिकां तरुणीमवलोक्य प्रवृद्धमदनांकुर: सम्पन्न: पांथोनेन निषेधद्वारेण तयाभ्युपगतइति निषेधाभावो त्र विधि: न च निमं
त्रणरूपो शब्द प्रवर्तनास्वभाव: सौभाग्याभिमानखेदनापदेशाद्दैव रात्र्यंधेति सम्भवितसमय संभाव्यमानविकाराकूलितत्वे
ध्वनितम् यद्वाहं भद्र नायकोहमित्यभिनयविशेषेण त्वं दशावेदनाच्छाद्य मेनतदपि इत्यत्राहमिति नावच्छेद्यस्य नायेसाका
दर्थ: काकादिसहायस्य वनावति ध्वननमेव व्यापार इति ध्वनेर्भूषणमेतत् अत्रेति प्रयत्नेना निभृतसंभोगपरिहार: अत्रप

(वाच्ये) (श्वश्रू: अत्र ननु शेते अत्र अहं दिवसकं प्रलोकय)
अत्रेत्यादि निषेधरूपो विधिरूपो यथा ॥ अत्ता इत्थ णुमज्जइ इत्थ अहं दिअसअं पलोअहि
(मा व पथिक रात्र्यन्ध शय्यायां आवयो: नि मङ्क्षि)
मा पहिअ रत्तिअंधअ सेज्जाए मह णुमज्जिहिसि १-॥

यदपि भवान्मदनपारवश्यादीर्घमाणदृष्ट्या उपेक्षितं नयत् तथापि किं करोमि पापो दिवसकोयमनवितत्वात् ज्ञातास्मि नो य
मित्यर्थ: प्राकृते पुंनपुंसकयोरनियम: न च सर्वथात्मपेक्ष्यो यतो ह्येवाहं नत्र लोकेन विनोदेन दिनेनावदति वाहयावइ
त्यर्थ: प्रतिपन्नमात्रायां वरात्रौ अन्धीभूतो मदीयां शय्यां माक्षिप्त्वा: अपितु निभृतमेतदत्राभिधाननिकटके ढकनिद्रालो
षणपूर्वकमिति इयदत्र ध्वन्यते १-॥

प्र॰ व= त्य

ध्व· माला १५ 15

व्रजमृमैवैकस्याभवंतनिःश्वासरोदितव्यानि मातर्वापितयाविनादाद्विएएवहृतस्वजनिष्वत मत्रव्रजेतिविपिःनव
मादादेवनाथिकांतरसंगमनंतव श्रुपितगाफ्तानरागादेवान्याहृइमुखरागोगोत्रसत्तलनादिवकेवलंपूर्वकृता

व्रज मम पव पक स्याभवंत निःश्वा सरो दित व्यानि मा त
कृविहाखेविधिरूपेनभयरूपोयथा वस्वमरहस्विषपक्वाद्हेतरणेसासरोइश्वाइमान
वा पि तया विना दा द्वि एव हृ त स्व जनि ष्व त
जविनीइविणादकखिणहृश्रमज्ञाश्रंत ११ ॥

नुपालनान्मनादाद्विएएनैकरूपताभिमानेनैवतमत्रस्थितस्तन्मर्वयाशदेशेसातिगाफमन्त्ररूपोयेखेंदितनाथिकाभि
प्रायोत्रश्रतीयते नवासौविषयभावरूपोनिषेधोनापिविष्यंतरमत्रनिषेधाभावः १२ ॥ १५

ध्वन्तरमन्यत्रनिषेधाभावात्

देशेति निपातः । अर्थं नायो अइति नावल्लभार्थे तेनायमर्थः । अर्थवेश्मनी दत्तावत निर्वर्तेस्वमुखे शशिज्योत्स्नाविततमतमोनिवहे
अभिसारिकाणां विघ्नं करोषि अन्यासामपि दृत्तारो अन्याप्यवसितान्निवर्तस्वेति प्रनीतेनिषेधो वाच्यः । शृङ्गारतिलकाटीका
स्वल्लिनाथ यवाधितिनायकेसति ततः प्रतिगतं यनुन्ना नायकेन चाहूपक्रमपूर्वकं निवर्त्यते न केवलं स्वात्मनो मम वा निवृ
त्या विघ्नं करोषि यावदन्यासामपि न तस्माव कदाचन न स्वखेलवलाभोपि भविष्यत्यत एवाह हतान्याशासीति वल्लभाभिप्राय रू
पश्चाद्विशेषो व्यङ्ग्यः । यदि वासमयोपदिश्यमानाचित दवृधीरणायागच्छेतीसख्योच्यते न केवलमात्मनो विघ्नं करोषि लाघवा
दवहमानमात्मानेक अवेतोश्च तनपवहतोशा यावद्दनवेद्विकाप्रकाशितमार्गतया अन्यासामभिसारिकाणां विघ्नं करोषीति सख्य
भिप्रायरूपश्चाद्विशेषो व्यङ्ग्यः । अत्र न व्याख्यानद्वयेपि पिव्यवसितास्वरोपगमनालिप्रयतमश्रवणगमना सृतिवर्त्तस्वेति पुनःशब्दवाच्य

कचिद्वाच्यप्रतिषेधरूपेन भयरूपो यथा देश्चोपसिश्रणिअत्तस्य मगहसासिजोण्हाविलुत्ततमणि

एवमिश्रातेगलीभून्व्यंग्यभेदस्य प्रेषोवदेह अहिसारिश्चाणं विघ्नं करोसि अण्णाणं मि तदश्चासे १२॥ स्वदल्लेकार
स्यो दाहवणंस्मा वधने : तेनायमत्रभावः कश्चिद् असाश्रियतममभिवेतीन हृद्याभिमुखमागच्छतानेनैव वृत्तदयवल्लभेनेवमपक्षो
क्ताते अत्रत्यभिज्ञानच्छेलेन अनेन वा स्मरति भिज्ञापनार्थमेवन भवव नर्दृत्ताशेरति अन्यासांच विघ्नं करोषि नवचे स्मिन लाभोभवि
ष्यति इतिकायन्याशाश्रतयवसदीयं वा शहमागच्छेतदीयं वागच्छावदिति भयत्रापि नात्मयोदनुभयरूपो वल्लभाभिप्रायः । वाहात्मा
वेशयदइसेवव्यवतिष्ठते अन्यत्र नस्याना सह्दयानाम भिसारिकाश्लोय मुक्तिरित्याहुः नतु दत्ताशोदन्याम त्रणादिषु तमपुकेवेति
सह्दयावश्यमाणं एवं वाच्यव्यंग्ययोर्धार्मिकपाम्यसियतमाभिसारिकाविषये कोपिस्वरूपविशेषाद्देदइति प्रतिपादितं अधुनात्ववि
षयभेदादपि व्यंग्यस्य वाच्याद्भेद इतिआह कचिद्वाच्यादिनिव्यवस्थापितः इति विषयभेदोपि विचित्ररूपोव्यवतिष्ठमानः सह्दयैर्व्यवस्थाप

८

शृं० ति० टी०

सु ८६

धन्या
लो ४
१९
16

कस्यवेतिम्प्रनीर्ष्यालोरपिनभवति रोषोहष्टेतिकृत्वापिकृतस्मिंदेवापूर्वेनयाप्रियायाःसव्रणमधरमवलोकसभ्रमरपद्माघ्राण
शीलेशीलंहिकर्यंचिदपिवारयितुंनशक्यम् वारितेवारणायांहेवामेनदंगीकारिणीसहस्वेदानीं उपालंभपरंपरामित्यर्थ
अत्रायंभावः काचिदविनीताङ्गनास्मिन्नेवाएरिनायका निस्त्रिनतन्स्यविषमंविधानेमनेविनदनवलोकमात्रयेवकयाविदि
दग्धमत्यान्तह्वाच्यतापरिहारायेतदुच्यते सहस्वेदानीमितिवाच्यमविनयवतीविषयं मर्तृविषयस्त्वपरायोनास्तीत्यावेद्य
मानेव्यंग्यम् तस्यांवप्रियतमेनगाधमुपालभ्यमानायांतद्यलीकदर्शनेकिनशातिवेषमिकलोकविषयंचाविनयप्रच्छादनेन

ध्यव
क स्य वा न भ वति रोषः दृ ष्ट्वा प्रि या याः स व्र ण म
क्वचिद्वाच्याद्विभिन्नविषयत्वेनव्यवस्थापितोयथा कस्सणभहोइरोसो दट्ठूणपिआइसव्वणंअ
ध र म् स भ्र म र प द्म घ्रा ण शीले वारि त वा मे स ह स्व इ दा नीम्
हरम् सभमरपम्म उग्घाइरिवारिअवामेसहसुइण्हि सी १३ ॥

: उ ऊ १९

प्रत्यायनंव्यंग्यम् तत्सपत्न्यांवतदुपालंभतदविनयप्रच्छादनायांसौभाग्यातिशयख्यापनंप्रियायाइतिशाहवतादित्तिसपत्नी
विषयंव्यंग्यम् सपत्नीमध्येइयताएवलीकृतास्मीतिलाघवमात्मनिग्रहीतेनगुरुंप्रमत्तायंबहुमानः सहस्वशोभस्वेदा
नीमिति सखीविषयंसौभाग्याख्यापनंव्यंग्यम् अद्ययंतवप्रकाशानुरागिणीहृदयवल्लभाइयंरक्षिताप्तुनःप्रकटरदनदूषण
विधिरत्रनगुरुःइतितच्चौर्यकामुकविषयंसंबोधनेव्यंग्यं इदंमयेयनदपङ्कमितिसखीवैदग्ध्याख्यापनेनतटस्थविदग्धलोकविषयंव्यंग्यं।

तदेवमनुक्तव्यवस्थापितशब्देन अग्रे इति द्वितीयोद्योते असंलक्ष्यक्रमो व्यंग्यः क्रमेणोद्योतित इति विवक्षितान्यपर।
वाच्यस्य द्वितीयप्रभेदवर्णनावसरे यथा हि विधिनिषेधतदुभयात्मना रूपेण संलक्ष्यक्रमवस्तुध्वनिः संक्षेपेणास्य वचनस्तथा

ओं अन्ये चैवंविधाः प्रकारा वाच्याद्विभेदिनः प्रतीयमानभेदाः संभवंति तेषां दिङ्मात्रमेतत्प्रद
र्शितम् द्वितीयोऽपि प्रभेदो वाच्याद्विभिन्नः सप्रपंचमग्रे दर्शयिष्यते तृतीयस्तु रसादिलक्षणः
प्रभेदो वाच्यसामर्थ्याक्षिप्तः प्रकाशते न तु साक्षाच्छब्दव्यापारविषय इति वाच्याद्विभिन्न एव तथा
हि वाच्यत्वं तस्य स्वशब्दनिवेदितत्वेन वा स्याद्विभावादिप्रतिपादनमुखेन वा पूर्वस्मिन्पक्षे स्वशब्दनिवे
दितत्वाभावे रसादीनामप्रतीतिप्रसंगः न च सर्वत्र तेषां स्वशब्दनिवेदितत्वं यत्राप्यस्ति तत्रापि विशि
ष्टविभावादिप्रतिपादनमुखेनैवैषां प्रतीतिः स्वशब्देन केवलमनूद्यते न तु तत्कृता विषयांतरे
तथा तस्या अदर्शनात् न हि केवलशृंगारादिशब्दमात्रभाजि विभावादिप्रतिपादनरहिते काव्ये
मनागपि रसवत्त्वप्रतीतिरस्ति १४ ॥

नालंकारध्वनिः अलंकाराणां भूयस्त्वान्ननयवोक्तं सप्रपंचमिति तृतीयस्त्विति शब्दो व्यतिरेके वस्त्वलंकारोपाख्याभिधेयत्वमप्या

तावद्रसभाववत्तदाभासतत्प्रशमाः पुनर्न कदाचिदभिधीयन्ते अथ चास्वाद्यमानतया प्रतिभान्ति तद्ध्वननव्यापाराद् ऋते
नान्यत्कल्पनीयतरम्। स्खलद्गतित्वाभावे मुख्यार्थबाधादेर्लक्षणानिबन्धनस्याशंकनीयत्वात्। अनौचित्येन तत्प्रवृत्तौ चित्त-
वृत्तेरास्वाद्यत्वे स्थायिन्या रसो व्यभिचारिण्या भावः। अनौचित्येन तदाभासः। रावणस्येव सीतायां रतेः; यद्यपि तत्र हास्यरसरूपतै-
व शृङ्गाराद्धि भवेद्धास इति वचनात्तथापि पाश्चात्येयं सामाजिकानां स्थितिः। तन्मयीभवनदशायां तु रतेरेवास्वाद्यतेति शृङ्गार-
तैव भाति। पौर्वापर्यविवेकावधीरणेन दूराकर्षणमोहमन्त्र इव मे तन्नाम्नि याते श्रुतिमित्यादौ तदाभासो शृङ्गाराभासएवमङ्कातावा
हृदयमाह्लादयति यतो विशेषेण तत्पतनस्य गृहीतोऽपि पृथग्गणितो भेदो यथा॥ एकस्मिन्शयने पराङ्मुखतया वीतोत्तरं
ताम्यतोरन्योन्यं हृदयस्थितेऽप्यनुनये संरक्षतोर्गौरवम्। दम्पत्योः शनकैरपाङ्गवलनामिश्रीभवच्चक्षुषोर्भग्नो मानकलिः स-
हासरभसव्यावृत्तकण्ठग्रहः॥ इत्यत्रेर्ष्याविप्रलम्भनाम्नो मानस्य प्रशमः। न चायं रसादिरर्थः पुत्रस्ते जात इत्यतो यथा
हर्षो जायते तथा नापि लक्षणया अपि तु सहृदयस्य हृदयसंवादबलाद्विभावप्रतीतेस्तन्मयीभावेनास्वाद्यमान एव
रस्यमानतैकप्राणः सिद्धस्वभावसुखादिविलक्षणः परिस्फुरति तदाह प्रकाशत इति तेन तत्र शब्दस्य ध्वननमेव
व्यापारोऽर्थस्य इत्यस्येति विभावाद्यर्थोऽपि तत्प्रजन्महृद्यमानो यन्नतो चित्तवृत्तिं जनयतीति जननातिरिक्तोऽर्थस्यापि
व्यापारो ध्वननमेवोच्यते स्वशब्देति शृङ्गारादिनाभिधाव्यापारवशादेव निवेदितत्वेनेति विभावादीनामपि तथाविधशब्दोपात्त-
त्वेः॥

तत्रस्वशब्दस्यान्वयव्यतिरेकौ रस्यमानतासारं रसं प्रति निराकर्तव्यं न न स्वैव तावितिति दर्शयति न च सर्वत्रेति यथा भट्टेन्दुराज
स्य यद्विश्रम्य विलोकितेषु बहुशो निःस्थेमनी लोचने यद्गात्राणि दरिद्रति प्रतिदिनं लूनाब्जिनीनालवत् दूर्वाकाण्डविडम्ब
कश्च निविडो यत्पाण्डिमा गण्डयोः कृष्णे यूनि सयौवनासु वनितास्वेषैव वेशस्थितिः ॥ इत्यत्रानुभावविभावावबोधनो
त्तरमेव तन्मयीभावनयुक्त्या तद्धि भावानुभावोचित चित्तवृत्तिवासनानुरञ्जितस्वसंविदानन्दचर्वणागोचरोऽस्यात्मा स्फु
रत्येव अभिलाषचिन्तौत्सुक्यनिद्राधृतिग्लान्यालस्यश्रमस्मृतिवितर्कादिशब्दाभावेऽपि एवं व्यतिरेकाभावं प्रदर्श्यान्वया।
भावं दर्शयति यत्रापीति तत्रादिति स्वशब्दनिवेदितत्वम् प्रतिपादनमुखेनेति शब्दप्रयुक्त्या विभावादिप्रतिपत्त्यर्थः
सा केवलमिति तथाहि याते द्वारवतीं तदा मधुरिपौ तद्दत्तझम्पानतां कालिन्दीतटरूढवञ्जुललतामालिङ्ग्य सोत्कं
ठया उद्गीतं गुरुबाष्पगद्गदगलत्तारस्वरं राधया येनान्तर्जलचारिभिर्जलचरैरप्युत्कमुत्कूजितम् ॥ इत्यत्र विभावानुभा
वमध्यानतया प्रतिपत्तेरूर्ध्वं तदुत्कण्ठा चर्वणागोचरं प्रतिपद्यत एव सोत्कं वशब्दः केवलं सिद्धं साधयति तर्कामित्यनेन तत्का
भावानुकर्षणे सोत्कं शब्दः प्रयुज्यमानोऽपि नानर्थकः पुनरनुभावप्रतिपादने हि पुनरुक्तमतन्मयीभावो वा तत्र तद्ध
तेत्यत्र देनमाह विपर्यये त्विति यद्विश्रम्येत्यादौ तद्विपर्यये भावेऽपि यज्जवति तन्वने तदीदृशिभावः प्रदर्शनमेवद्रढयति तद्धी
ति केवलशब्दार्थं स्फुरयति विभावादीति काव्यमिति तवमनेकाव्यरूपतया प्रयुज्यमानमित्यर्थः मनागपीति ॥ शृङ्गार
हास्यबीभत्सरौद्रवीरभयानकाः करुणाद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः इत्येवं स्वशब्देन सह रसादेर्व्यतिरेकान्वया
भावमुपदर्शयितमेवोपसंहरति यत इत्यादिना कथंचिदित्यनेन १५ ॥

ध्वन्या-
लोच-
१८

अभिधेयमेव सामर्थ्यं सहकारिशक्तिरूपं विभावादिकं रसध्वनने शब्दस्य कर्तव्ये अभिधेयस्य च तज्जन्महृदयाभिन्नयोग
ह्येमतया जननव्यतिरिक्ते दिवाभोजनाभावविशिष्टपीनत्वानुमितरात्रिभोजनविलक्षणेन यथा वानुमानव्यतिरिक्ते ध्वन
ने कर्तव्ये सामर्थ्यं शक्तिविशिष्टसमुचितवाचकसाकल्यमिति द्वयोरपि शब्दार्थयोर्ध्वननव्यापारः एवं ह्येपदत्तावुपक्र
म्याद्योद्भूषितः द्वितीयस्तु कथं विदेगोंऽकृतः जननानुमानव्यापाराभिप्रायेणोद्भूषितः ध्वननाभिप्रायेणोऽङ्गीकृतः यस्त्वत्रा

ङ्गं यतश्च स्वाभिधानमन्तरेण केवलेभ्यो विभावादिभ्यो विशिष्टेभ्यो रसादीनां प्रतीतिः केवला।
च्च स्वाभिधानमात्रादप्रतीतिः तस्मादन्वयव्यतिरेकाभ्यामभिधेयसामर्थ्याक्षिप्तत्वमेव रसा।
दीनां न त्वभिधेयत्वं कथंचिदिति तृतीयोऽपि प्रभेदो वाच्याद्भिन्न एवेति स्थितं वाच्येन त्वस्य स
हेव प्रतीतिरित्यग्रे दर्शयिष्यते १५ ॥

पि तात्पर्यशक्तिमेव ध्वननं मन्यन्ते स न वस्तुतत्त्ववेदी विभावानुभावप्रतिपादके हि वाक्ये तात्पर्यशक्तिः भेदसंसर्गे वा पर्यव
स्येन्न तु रस्यमानतासारे रसे इत्यलं बहुना इति शब्दो हेत्वर्थः इति अतो हेतोरयं तृतीयोऽपि प्रकारो वाच्याद्भिन्न एवेति संबन्धः
सहैवेति इव शब्देन विद्यमानोऽपि क्रमो न संलक्ष्यत इति दर्शयति अग्रे इति द्वितीयोद्योते ॥ १५ ॥ १८

मान=

हासव्याजेनैव दर्शयति काव्यस्यात्मेति स एवेति प्रती
यमानेपि=१

एवंप्रतीयमानंपुनरन्यदेवेति इयताध्वनिस्वरूपंव्याख्यातं अधुनाकाव्यात्मत्वमितिप्रक्रांतेतृतीयएवरसध्वनिरिति
मंतव्यमितिहासबलात्प्रक्रांतद्वितीयस्यार्थवस्तुत्वेनरसएववस्तुतआत्मावस्त्वलंकारध्वनीतरसंप्रतिपर्यवस्यतइतिवा।

काव्यस्यात्मासएवार्थस्तथाचादिकवेःपुराक्रौंचद्वंद्ववियोगोत्थः शोकःश्लोकत्वमागतः ॥
विविधविशिष्टवाच्यवाचकरचनाचारुणःकाव्यस्यसारभूतःसएवार्थः सन्निहितसहचरीविर
हकातरक्रौंचाक्रन्दजनितःशोकएवश्लोकतयापरिणतः ॥ मानिषादप्रतिष्ठांत्वमग
मःशाश्वतीःसमाः यत्क्रौंचमिथुनादेकमवधीःकाममोहितम् ५ ॥

व्याङ्गत्यसंनाविच्यभिप्रायेणध्वनिःकाव्यस्यात्मेतिसामान्येनोक्तम्. शोकइतिक्रौंचस्यद्वंद्ववियोगेनसहचरीहननोद्भूतेन
साहचर्यध्वंसनेनउत्थितोयःशोकःस्थायिभावोनिरपेक्षभावत्वाद्विप्रलंभशृंगारोचितस्थायिभावत्वादन्यएव सएवतथाभूत।

ध्वन्या
लो॰ प्र॰
१९
19

विभावतदुत्थाक्रंदाद्यनुभावचर्वणया हृदयसंवादतन्मयीभवनक्रमादास्वाद्यमानतां प्रतिपन्नः करुणरसरूपतां लौ
किकशोकव्यतिरिक्तां स्वचित्तद्रुतिसमास्वाद्यसारां प्रतिपन्नो रसः परिपूर्णकुंभोच्छलनवच्चित्तवृत्तिनिःष्यन्दस्वभाव
वाग्विलापादिवत्समयानपेक्षत्वेपि चित्तवृत्तिव्यंजकत्वादिति नयेनाकृतकतयैवावेशवशात्समुचितछन्दोवृत्तादि
नियंत्रितश्लोकरूपतां प्राप्तः मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः यत्क्रौंचमिथुनादेकमवधीः काममोहि
तमिति न तु मुनेः शोक इति मंतव्यम् एवं हि सति तद्दुःखेन सोपि दुःखित इति कृत्वा रसस्यात्मतेति निरवका
शं भवेत् न तु दुःखसंतप्तस्यैषा दशेति एवं हि चर्वणोचितशोकस्थायिभावात्मककरुणरससमुच्छल
नस्वभावत्वात्स एव काव्यस्यात्मा सारभूतस्वभावोपरशब्दवैलक्षण्यकारकः एतदेवोक्तं हृदयदर्पणे यावत्
पूर्णो न चैतेन तावन्नैव वमत्यमुमिति छंदांस्येतेनांगमेन सर्वेष्वेव काव्येषु लादिमाद नान्यआत्मा तेन यदाह भट्ट
नायकः शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग्विदुः अर्थे तत्त्वेन युक्ते तु वदंत्याख्यानमेतयोः द्वयोर्गुणत्वे व्यापार
प्राधान्ये काव्यधीर्भवेत् इत्याशंक्य व्यापारो हि यदि ध्वननात्मा रसनास्वभावस्तन्नापूर्वमुक्तं अभिधैव व्यापारस्तथाप्य
स्याः प्राधान्यं नेत्यावेदितं प्राक् श्लोकं व्याचष्टे विविधेति विविधं तत्तदभिव्यंजनीयरसानुगुण्येन विचित्रकत्वा वाच्य
वाचकरचनायां च पश्चादुपात्ताया व्यालंकारगुणानुकूलमित्यर्थः तेन सर्वत्रापि न ध्वनसद्भावेपि तथा व्यवहारः आत्मसद्भावे
पि क्वचिदेव जीवव्यवहार इत्युक्तं प्रागेव तेन नात्निरवकाशं यदुक्तं हृदयदर्पणे सर्वत्र तर्हि काव्यव्यवहारः स्यादिति
निहतसहचरीति विभावउक्तः आक्रन्दितशब्देनानुभावः जनित इति चर्वणागोचरत्वेनेति शेषः १८ ॥

१९

ननु शोकचर्वणातो यदि श्लोकस्तद्भूतः तत्प्रतीयमानं वस्तु काव्यस्यात्मेति कृतमित्याशंक्याह शोको हीति करुणरसस्य तच्चर्व-
णागोचरात्मनः शोकः स्थायिभावः शोके हि स्थायिभावे यदि भावानुभावाः तत्समुचिताश्चित्तवृत्तिः चर्वणात्मा रस इत्यौ-
चित्यात् स्थायिनो रसतापत्तिरित्युच्यते शोकस्वसंविदितं परगतं अनुमितं च चित्तवृत्तिजातं संस्कारक्रमेण हृदयसंवादमादधानं
चर्वणायामुपयुज्यत एव ननु प्रतीयमानरूपमात्मा तस्य त्रिभेदः प्रतिपादितो न तु रसैकरूप मनेनैवेति ह्यनेन रसस्यैवात्म-
भूतत्वमुक्तं भवतीत्याशंक्याभ्युपगमेनैवोत्तरमाह प्रतीयमानस्यैवेति अन्यो भेदौ वस्त्वलंकारात्माभाव यद्ग्रहणं व्यभिचा-

ॐ शोको हि करुणरसस्थायिभावः प्रतीयमानरूप एवेति प्रतिपादितम् प्रतीयमानस्य चान्यभे-
दप्रदर्शनेऽपि रसभावमुखेनैवोपलक्षणं प्राधान्यात् १० ॥

रिणोऽपि चर्व्यमाणस्तावन्मात्रविश्रान्तावपि स्थायिचर्वणापर्यवसानोचितरसप्रतिष्ठामनयाप्यापि प्राणकत्वं भवतीत्यु-
क्तम् यथा नवेन नखाग्रेण वितद्वयन्ती विवर्तयन्तीव लयं विलोलम् आमन्द्रमाशिञ्जितनूपुरेण पादेन मन्दं भुवमालिखन्
ती इत्यत्र लज्जाया रसभावशब्देन च तदाभासतत्प्रशमावपि संगृहीतावेव प्रवीणत्वैविध्येऽपि न देकरूपत्वात् प्राधान्यादिति
रसपर्यवसानादित्यर्थः तावन्मात्रविश्रान्तावपि चान्यशब्दवैलक्षण्यकारित्वेन वस्त्वलंकारध्वनेरपि जीवितत्वमौ-
चित्यमक्षमितिभावः १० ॥

ना द्व

एवमितिह्यासम्प्रत्वेन प्रतीयमानस्य काव्यात्मतां प्रदर्श्य स्वसंवित्सिद्धमप्येतदिति दर्शयति सरस्वतीति वाग्रूपा भगवती
त्यर्थः अर्थशब्देन वस्तुशब्दं वस्तुशब्देन तत्त्वशब्दं च वस्तुशब्द आचष्टे निःष्यन्दमानेति विद्यमानत्वरसं स्वयमेव प्रस्नु
वानेत्यर्थः यदाह भट्टनायकः वाग्धेनुर्दुग्ध एतं हि रसं यद्बालतृष्णया तेन नास्य समः स स्याद्दुह्यते योगिभिर्हि यः तदा
वेशेन विनाप्याकांक्ष्या हि योगिभिर्दुह्यते अत एव यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे इत्यनेन सा
रात्मवस्तुपात्रत्वं हिमवत उक्तम् अभिव्यनक्ति परिस्फुरन्तमिति प्रतिपदं नूतनतया प्रतिभानात्त्रमीयमाना अपि तत्तदावेशेन भा

ॐ सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम् ॥ अलोकसामान्यं प्रतिभावि
शेषं परिस्फुरन्तमभिव्यनक्ति ॥ येनास्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे का
लिदासप्रभृतयो द्वित्राः पंचषा वा महाकवय इति गण्यन्ते ६ ॥

वस्तुतत्त्वं निःष्यन्दमाना महतां कवीनां सरस्वती
लोकासामान्यं प्रतिभाविशेषं परिस्फुरन्तमभिव्यनक्ति = २

समानेत्यर्थः यथोक्तमस्मदुपाध्यायभट्टतौतेन नायकस्य कवेः श्रोतुः समानोऽनुभवस्ततः इति प्रतिभा अपूर्ववस्तुनिर्मा
णक्षमा प्रज्ञा तस्या विशेषो रसावेशवैशद्यसौन्दर्यकाव्यनिर्माणक्षमत्वं यदाह मुनिः कवेरन्तर्गतं भावमिति येनेत्यभि
व्यक्तेन स्फुरता प्रतिभाविशेषेण निमित्तेन महाकवित्वगणनेति यावत् ६ ॥

ध्वन्या
लोक.
२१

21

न=२

इदं चेति न केवलं प्रतीयमानं उ न वस्त्व देवैस्तत्कारिकास्थवितौ स्वरूपविषयभेदौ एवं यावद्भिन्नसामग्रीवेद्यत्वमपि वाच्या।
निर्दिष्टत्वे प्रमाणमिति यावत् वेद्यते इति न तु वेद्यते येन न स्यात् द्रसावितिभावः काव्यस्य तत्त्वभूतो योऽर्थस्तस्य भावनावाच्यातिरेके
ण नवरतं चर्वणा तत्र विमुखानां स्वराः षड्जादयः सप्त श्रुतिर्नाम शब्दस्यैव तत्त्वज्ञानमात्रकाविषयरूपान्तरं तत्परिणाममाण ....

न

इदं चापरं प्रतीयमानस्यार्थस्य सद्भावसाधनं प्रमाणम् शब्दार्थशासनज्ञानमात्रेणैव न तु वेद्यते वेद्यते
स हि काव्यार्थतत्त्वज्ञैरेव केवलम् योऽर्थो शासनज्ञानमात्रेणापि न वेद्यते सोऽर्थो यस्मात् केवलं काव्या
र्थतत्त्वज्ञैरेव ज्ञायते यदि वाच्यरूप एवासावर्थः स्यात् तद्वाच्यवाचकस्वरूपपरिज्ञानादेव तत्प्रतीतिः स्यात्
अथ च वाच्यवाचकलक्षणमात्रकृतश्रमाणां काव्यार्थतत्त्वभावनाविमुखानां स्वरश्रुत्यादि ल
क्षणं विदामगोचर एवासावर्थः ॥७॥

शिव प्रगीतानां गान्धर्वलक्षण

स्वरान्तरं तद्गतोऽभयभेदकल्पिना द्वाविंशतिविधाः श्रुत्यादिग्रहणेन तानालंकारग्रामरागभाषाविभाषान्तरभाषा देशीमार्गरूपं ते
प्रकृष्टं गीतं गानं येषां ते प्रगीताः गातृव्याप्रख्या इत्यादिकर्मणि षष्ठी आरंभेण चात्र फलपर्यन्तता लक्ष्यते ॥७॥

एवमिति स्वरूपभेदेन विषयभेदेन भिन्नस्यामुष्य ज्ञेयत्वेन वेत्यर्थः । प्रत्यभिज्ञेयाविति प्रहीर्थे कृत्यः । सर्वो हि तयायतनत इतीयता
प्राधान्ये लोकप्रसिद्धत्वं प्रमाणमुक्तम् नियोगार्थेन वक्तव्येन शिक्षाक्रम उक्तः । प्रत्यभिज्ञेयशब्देनेदमाह काव्यं तु जातु जायेत ।
कस्यचित्प्रतिभावत इति नयेन यद्यपि स्वयमस्यैव तत्त्वविद्भातीति तथापीदमित्थमिति विशेषतो निरूप्यमाणं महत्त्वशालि
भवति यथोक्तमस्मत्परमगुरुभिः श्रीमदुत्पलदेवपादैः । तैस्तैरप्युपयाचितैरुपनतस्तन्व्याः स्थितोऽप्यन्तिके कान्तो लोकस
मान एव न परिज्ञातो नो रन्तुं यथेति तेन ज्ञानस्यापि विशेषतो निरूपणं नसन्ध्यानात्मकमत्र प्रत्यभिज्ञानं न तत्तदेवेदमित्येता ।

एवं वाच्यव्यतिरेकिणो व्यंग्यस्य सद्भावं प्रतिपाद्य प्राधान्यं तस्यैवेति दर्शयति ॥ सोऽर्थस्तद्व्यक्ति
सामर्थ्ययोगी शब्दश्च कश्चन यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः ॥ स व्यंग्योऽर्थस्तत्प्रकाशन
सामर्थ्ययोगी शब्दश्च कश्चन न सर्वः । तावेव शब्दार्थौ महाकवेः प्रतिभिज्ञेयौ व्यंग्यव्यंजकाभ्यामेव ।
हि सम्यक्प्रयुक्ताभ्यां महाकवित्वलाभो महाकवीनाम् न वाच्यवाचकरचनामात्रेण ८ ॥

वन्मात्रम् महाकवेरिति यो महाकविरहं भूयासमित्याशास्ते एवं व्यंग्यस्यार्थस्य व्यंजकस्य च शब्दस्य प्राधान्यं वदता व्यंग्य
व्यंजकभावस्यापि प्राधान्यमुक्तम् इति ध्वननं ध्वन्यते ध्वननमिति त्रितयमप्युपपन्नमित्युक्तम् ननु प्रथमोपादीयमानता हि वाच्याव
कतन्नावस्यैव किं न प्राधान्यमित्याशंक्योपायानामेव प्रथममुपादानं भवतीत्यभिप्रायेण विरुद्धोऽपि प्राधान्ये सामर्थ्ये हेतुरिति निदर्शयति
इदानीमित्यादिना ९ ॥

ध्वे-१

आलोकनमालोकः वनितावदनारविन्दावलोकनमित्यर्थः। तत्रचोपायोदीपशिखा २१ ॥ प्रतिपदितिभावेक्विप् तस्यव

इदानींव्यंग्यव्यंजकयोःप्राधान्येपियद्वाच्यवाचकावेवप्रथममुपाददतेकवयः तदपियुक्तमेवे।
त्याह ॥ आलोकार्थीयथादीपशिखायांयत्नवांजनः तदुपायतयातद्वदर्थेवाच्येतदादृतः ॥
यथाह्यालोकार्थीसन्नपिदीपशिखायांयत्नवांजनोभवति तदुपायतया नहिदीपशिखामंतरे
णालोकःसंभवति तद्वद्व्यंग्यमर्थंप्रत्यादृतोवाच्येर्थेयत्नवान्भवति अनेनप्रतिपादकस्यक
वेर्व्यंग्यप्रतिव्यापारोदर्शितः प्रतिपाद्यस्यापितंदर्शयितुमाह ~~इदानीमित्यादिना~~ २१ ॥
यथापदार्थद्वारेणवाक्यार्थःसंप्रतीयते वाच्यार्थपूर्विकातद्वत्प्रतिपत्तस्यवस्तुनः यथापदार्थद्वा
रेणवाक्यार्थावगमस्तथा वाच्यार्थपूर्विकाव्यंग्यस्यार्थस्यप्रतिपत्तिः २२ ॥

स्तुन इति व्यंग्यरूपस्यसारस्येत्यर्थः अनेनश्लोकेतात्यंतसहृदयोयोनभवति तस्यैवस्फुटसंवेद्यपवक्रमोयथा अत्यंतशह
हृत्तोयोनभवतितस्यपदार्थवाक्यक्रमः २२ ॥

त=२ का=३

काशमानसहृदयभावस्य तु वाक्यार्थे तत्कुशलस्यैवमत्रापि क्रमोऽभ्यस्ताविनाभावस्मृत्यादिवदसंवेद्यः न त्वालुप्यत इति
प्राधान्यादेव तु अस्पर्शनान्तरस्मरणादिना मध्ये विश्रान्तिं न कुर्वत इति क्रमस्य सतोऽप्यलक्षणं प्राधान्ये हेतुः स्वसामर्थ्यमाकांक्षा
योग्यतासन्निधयः विभाव्यत इति विषादेन विभक्ततोऽयो विभक्ततया न भाव्यत इत्यर्थः अनेन विद्यमान एव क्रमो न संवे
द्यत इत्यर्थः तेन यत्स्फोटाभिप्रायेण सत्त्रिवक्रम इति व्याचक्षते तत्स्वतन्त्रविरुद्धमेव वाक्यार्थविमुखो विश्रान्तिनिबंधनं

ॐ इदानीं वाच्यार्थप्रतीतिपूर्वकत्वेऽपि तत्प्रतीतेर्व्यङ्ग्यस्यार्थस्य प्राधान्यं यथा न व्यालुप्यते तथा
दर्शयति स्वसामर्थ्यवशेनैव वाक्यार्थं प्रथयन्नपि। यथा व्यापारनिष्पत्तौ पदार्थो न विभाव्य
ते ॥ यथा स्वसामर्थ्यवशेनैव वाक्यार्थं प्रकाशयन्नपि पदार्थो व्यापारनिष्पन्नो न विभाव्यते विभ।
क्ततया तद्वत्सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनां बुद्धौ तत्त्वार्थदर्शिन्यां झगित्येवावभासते यत्रा
वभासते २२ ॥

परितोषमलभमानस्तात्पर्यहृदयं येषामित्यनेन सचेतसामित्यस्यैवार्थो विभक्तः सहृदयानामेव न तु यं महिमा स्वरूपतन्त्रकाव्य।
स्यासौ कश्चिदतिशय इत्याशंक्याह यत्रावभासत इति तेनात्र विभक्ततया नावभासते ननु वाच्यस्यैव सवेद्यानवभासः अतएव तद्
तीयोद्योते चटप्रदीपदृष्टान्तेन बलाद्योग्यप्रतीतिकालेऽपि वाच्यप्रतीतिर्न विघटत इति यद्वक्ष्यति तेन सहास्य ग्रन्थस्य न विरोधः २२

ध्वन्या- लो १- २२

सद्भावमिति सद्भावं साधुभावं प्रथयान्नं चेत्यर्थः । हृदयं हि शब्दनिष्पिपादयिषितं पूर्वैरुक्तमेतेति लक्षणे उपयोजयन्निति उपयोगं मामय
न्. तमर्थमिति निवायमनुपयोगः स्वशब्देनात्मवाची स्वश्चात्मा च यस्य स्वार्थौ गौणाभ्यां यथासंख्येन तेनार्थेन गुणीकृतात्मा शब्दो
गुणीकृताभिधेयः तमर्थमिति सरस्वतीस्वादु तदुक्तवस्त्विति यदुक्तं व्यंक्तः द्योतयतः व्यङ्क्त इति हि वचनेनेदमाह यथप्य

एवं वाच्यव्यतिरेकिणो व्यंग्यस्यार्थस्य सद्भावं प्रतिपाद्य प्रकृते उपयोजयन्नाह ॥ यत्रार्थः शब्दो
वा तमर्थमुपसर्जनीकृतस्वार्थौ व्यंक्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥ यत्रार्थो
वाच्यविशेषः शब्दो वा तमर्थं व्यंक्तः स काव्यविशेषो ध्वनिरिति अनेन वाच्यवाचकचारुत्वहेतुभ्य
उपमादिभ्योऽनुप्रासादिभ्यश्च विभक्त एव ध्वनेर्विषय इति दर्शितं यदप्युक्तं प्रसिद्धप्रस्थानातिक्रमि
णो मार्गस्य काव्यत्वहानेर्ध्वनिर्नास्तीति तदप्ययुक्तं यतो लक्षणकृतामेव स केवलं न प्रसिद्धो ल
क्ष्ये तु परीक्ष्यमाणे स एव सहृदयाह्लादि काव्यं ततोऽन्यच्चित्रमित्यग्रे दर्शयिष्यामः । यदप्युक्तं क
मनीयमनतिवर्तमानस्य तस्योक्तालंकारादिप्रकारेष्वन्तर्भाव इति ॥ व्यंग्यशब्द एव व्यंजक

विवक्षितेन वा

स्तथाप्यर्थस्यापि सहकारितां नन्वत्राति अन्यथा नत्र्ता नार्थोऽपि शब्दस्त व्यंजकः स्यात् विवक्षितान्यपरवाच्ये च शब्द
स्यापि सहकारित्वं भवत्येव विशिष्टशब्दाभिधेयतया विना तस्यार्थस्याव्यंजकत्वादिति सर्वत्र शब्दार्थयोरुभयोरपि
ध्वननं व्यापारः तेन यद्भट्टनायकेन हि वचनं दूषितं तन्नजानन्मीलिकयैव यत्रार्थः शब्दो वेति विकल्पाभिधानं प्राधान्याभि

अर्थोऽपि वाच्यो वा ध्वनतीति शब्दोऽप्येवम् व्यङ्ग्यो वा ध्वन्यत इति व्यापारो वा

काव्यं च न हि शेषस्यासौ काव्यस्याविशेषः काव्यग्रहणं गुणालंकारोपस्कृत शब्दार्थपृष्ठपाती ध्वनिलक्षण आत्मेत्युक्तं तेन नैनं त्रिरवकाशो स्फुटार्थापन्नाविषध्वनिव्यवहारः स्यादिति यच्चोक्तं चारुत्वप्रतीतिस्तर्हि काव्यस्यात्मा स्यादिति तदङ्गीकृ मेव नास्ति खल्वयं विवाद इति यच्चोक्तम् चारुणः प्रतीतिर्यदि काव्यात्मा प्रत्यक्षादिप्रमाणादपि सा भवेत्तथा स्यादिति न तु शब्दार्थमयकाव्यात्माभिधानप्रस्तावे कथं प्रसंग इति न किंचिदेतत् स इति अर्थो वा शब्दो वा व्यापारो वा शब्दार्थयोर्ध्वनन मिति कारिकया तु प्राधान्येन समुदाय एव काव्यरूपो मुख्यतया ध्वनिरिति प्रतिपादितम् विभक्त इति गुणालंकाराणां वाच्य

तदयमसमीचीनम् यतो वाच्यवाचकमात्राश्रयिणि प्रस्थाने व्यंग्यव्यंजकसमाश्रयेण व्यवस्थितस्य ध्वनेः कथमन्तर्भावः वाच्यवाचकचारुत्वहेतवस्तस्यांगभूता न तु तदेकरूपा एवेति प्रतिपादयिष्यमाणत्वात् परिकरश्लोकश्चात्र व्यंग्यव्यंजकसंबन्धनिबन्धनतया ध्वनेः वाच्यवाचकचारुत्वहेत्वन्तःपातिता कुतः १४ ॥

वाचकभावप्राणत्वात् अस्य च तद्व्यंग्यव्यंजकभावसारत्वान्नास्य तेष्वन्तर्भाव इति अन्यत्र भावो विषयार्थः एवं तावदतिरिक्तः कोऽयं ध्वनिरिति निरूपितम् लक्षणकृतामेवेति लक्षणकाराप्रसिद्धता विरुद्धो हेतुः भवन्तु भगीरथादयः स्यादिकस्य तत्काव्यस्य वाक्तापि न किंचिच्चित्रमिति विस्मयकृद्वृत्तादिवर्णनसमुद्यदभिलषणीयचमत्कारसारसरसनिःष्यन्दमयमित्यर्थः काव्यानुकारित्वाद्वा विभेते एषु भावनाहाकलाभावत्वाद्वा अप इति प्रधानगुणभावाभ्यां व्यंग्यस्यैवं व्यवस्थिते द्विधा काव्ये ततोऽन्यद्यत्तच्चित्रमभिधीयत इति तृतीयो यो नैवास्ति परिकरार्थं कारिकार्थस्याधिकावापं कर्तुं श्लोकः परिकरश्लोकः १४

तत एव हि यत्नेन लक्षणीयता लक्षयत्व प्र सिद्धकत्वमसिद्धो हेतुः =४

ध्वन्या
लो प्र.
२५

येऽप्यलंकारे वैशद्येनेति वा सन्तयास्फुटतया चेत्यर्थः। अभिहितमिति भूतप्रयोगः। आदौ व्यञ्जकत्वस्य व्याख्यातत्वात्। गुणीकृतात्मे
ति आत्मशब्देन स्वशब्दस्यार्थो व्याख्यातः। न चैतदिति व्यङ्ग्यस्य प्राधान्यं प्राधान्यं च तत्त्रियपर्यवसानचकास्ति उक्तो न तावद्भासित्यामि
ति नयेनाहं व्यङ्ग्योपचारेण विश्रान्तेस्तथापि विवेचके जीवितान्वेषणे क्रियमाणे यत्र व्यङ्ग्योऽर्थः पुनरपि वाच्यमेवानुप्राणयन्नास्ते न तत्रा

ऽनेन तु यत्र प्रतीयमानस्यार्थस्य वैशद्येनाप्रतीतिः स नाम मा भूद्ध्वनेर्विषयः। यत्र तु तत्प्रतीतिरस्ति
यथा समासोक्त्याक्षेपानुक्तनिमित्तविशेषोक्तिपर्यायोक्तापह्नुतिदीपकसंकरालंकारादौ न तत्र ध्व
नेरन्तर्भावो भविष्यतीत्यादि निराकर्तुमभिहितम्। उपसर्जनीकृतस्वार्थाविति। अर्थो गुणीकृतात्मा
गुणीकृताभिधेयः शब्दो वा यत्रार्थान्तरमभिव्यनक्ति स ध्वनिरिति। तेषु कथं तस्यान्तर्भावः। व्यङ्ग्यप्राधा
न्ये हि ध्वनिः। न चैतत्समासोक्त्यादिष्वस्ति। समासोक्तौ तावत्। उपोढरागेण विलोलतारकं तथा गृ
हीतं शशिना निशामुखम्। यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद्गलितं न लक्षितम्॥

तदुपकरणत्वादेव तस्यालंकारता। तेनो वाच्यादेव तदुपस्कृताच्चमत्कारलाभ इति यद्यपि व्यङ्ग्येऽरसध्वनिरस्ति तथापि मध्यक
क्ष्यानिविष्टो व्यङ्ग्योऽर्थो न रसोन्मुखीभवति स्वातन्त्र्येणापि तु वाच्यमेव व्यङ्ग्यसंस्कृतं यावतीति गुणीभूतव्यङ्ग्यतोक्ता समा।
सोक्ताविति यत्रोक्तेर्गम्यतेऽन्योऽर्थस्तत्समानैर्विशेषणैः। सा समासोक्तिरुदिता संक्षिप्तार्थतया बुधैरिति च समासोक्तेर्लक्ष
णं स्वरूपं देवत्वेन्नीमत्रिवैचनमिति पादचतुष्टयेन क्रमाडक्रम। उपोढरागेणेत्यादौ सांध्योहणीमाप्रेमवयेन विलोलतास्ता

रकाज्योतींषि विनेत्रत्रिभागस्य यत्र न षेति फणिन्येव प्रेमबन्धेन गृहीतमाभाभासिते परिचुंबितम्बाकोतं च । निपायामृतं
शशिभो वदनकोकनदं वेति य इति यथा कृटिति ग्रहणेन प्रेमबन्धेन वा तिमिरं वस्त्रं कं सूक्ष्मांशेन च । तिमिरांशुकं रश्मिशबली
कृतं तमःपटलं तिमिरांशुकं नीलजालिकानवाच्छादितो वपूरुदितारागात्सम्बन्धात्संध्यारागाद्भूतेन रप्रेमरूपाद्धेतोः पूर्वे।
पिपूर्वस्यां दिशि श्रपव गलितं पश्यंतं पतितं नवनया राज्ञा करणभूतया समस्तं मिश्रितं उपलक्षणेनेवानन्तविलिनं रात्रिमुखे भो

इत्यादौ व्यंग्येनानुगतं वाच्यं प्राधान्येन प्रतीयते समारोपितनायिकानायकव्यवहारयोर्निशाशशिनोः
वैरेव वाक्यार्थत्वात् आक्षेपेऽपि व्यंग्यविशेषाक्षेपिणो वाच्यस्यैव चारुत्वम् प्राधान्येन वाक्यार्थ आक्षे
पोक्तिसामर्थ्यादेव ज्ञायते तत्र शब्दोपारूढो विशेषाभिधानेच्छया प्रतिषेधरूपो य आक्षेपः स एव व्यंग्य
विशेषमाक्षिपन् मुख्यं काव्यशरीरम् चारुत्वोत्कर्षनिबन्धना हि वाच्यव्यंग्ययोः प्राधान्यविवक्षा य
था ॥ अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः अहो दैवगतिः कीदृक्तथापि न समागमः ॥ अत्रापि व्यं
ग्यप्रतीतौ वाच्यस्यैव चारुत्वमुत्कर्षवदिति तस्यैव प्राधान्यविवक्षा यथा च दीपकापह्नुत्यादौ

सा विदितेन ज्ञानम् तिमिरसंवलितांशुदर्शनेऽह्नि रात्रिमुखमिति लोकेन तत्क्षणे नूतनस्फुरदालोके नायिकापक्षे गतये।
तिकहृदयं रात्रिपक्षे अपि शङ्कितेन लक्षितेन मिश्रस्थानेन रः अत्र च नायकेन यस्माज्ञेन तेन चुंबनोपक्रमे पुरो नीलांशुकस्य गल
नं पतनं न परिचायुरोऽग्रे तथा गृहीतेन नायकेन मुखमिति संबन्धः तेनात्र व्यंग्ये प्रतीतेऽपि न प्राधान्यं ततोऽपि नायिकाव्यवहा
रो निशाशशिनोरेव शृंगाररविभावरूपो संस्कृतीणां वसंकाभक्तोभजेते ततस्तु वाच्यादिभावीभूतावसनिः ध्वन्दः

उन्नीतोऽभिधेय एव न व्यङ्ग्यः इत्यत एव समासोक्तिः तत्प्रकृतार्थमेव ग्रन्थार्थमत्य जत्व व्यङ्ग्योऽनानुगतमिति एकदेशविवर्ति चेत्थं रूपकं स्यात् = २

ध्वन्यालोक २५

25

यत्तु व्याचष्टे तस्या निशायेति कर्तृपदं न वाचेतनायाः कर्तृत्वमुपपन्नमिति शब्देनैव नायिकाव्यवहारः राजहंसैरवीज्यन्त शरदेव सरोनृपाः इतिवत् न तु समासोक्तिस्तस्य विशेषणभावाद्गम्यते इति तानेनाभिधाव्यापारनिरासादित्यलमवान्तरेण बहुना नायिकायानायकयोर्व्यवहारः स निशायां समारोपितः नायिकायां नायकस्येव व्यवहारः स शशिनि समा

व्यङ्ग्यत्वेनोपमायाः प्रतीतावपि प्राधान्येनाविवक्षितत्वान्न तया व्यपदेशः न तु दत्रापि द्रष्टव्यं यत्र तु निमित्तायामपि विशेषोक्तौ आहूतोऽपि सहायैरेमीत्युक्त्वा विमुक्तनिद्रोऽपि गन्तुमना अपि पथिकः संकोचं नैव शिथिलयति इत्यादौ व्यङ्ग्यस्य प्रकरणसामर्थ्यात्प्रतीतिमात्रेण तत्प्रतीतिनिमित्ता काचिच्छित्तिरस्तीति न प्राधान्यम् पर्यायोक्तेऽपि यदि प्राधान्येन व्यङ्ग्यत्वे तद्भवतु नाम तस्य ध्वनावन्तर्भावो न तु ध्वनेस्तत्रान्तर्भावः तस्य महाविषयत्वेनाङ्गित्वेन च प्रतिपादयिष्यमाणत्वात् न पुनः पर्यायोक्ते भामहोदाहृतसदृशे व्यङ्ग्यस्यैव प्राधान्यम् वाच्यस्य तत्रोपसर्जनीभावेनाविवक्षितत्वात् अपह्नुतिदीपकयोः पुनर्वाच्यस्य प्राधान्यं व्यङ्ग्यस्यानुयायित्वं प्रसिद्धमेव संकरालंकारेऽपि यदालंकारोऽलंकारान्तरच्छायामनुगृह्णाति तदा व्यङ्ग्यस्य प्राधान्येनाविवक्षितत्वान्न ध्वनिविषयत्वम् २५ ॥

रोपितः इति व्याख्यानेन को दोषप्रसंगः आक्षेपे इति प्रतिषेधरूपस्य यो विशेषाभिधित्सया व्यवस्थापितोऽस्य विषयः स ग्राह्योऽपोहितमतः तत्राधेयता ॥ अहं त्वां यदि नेक्षेय क्षणमप्युत्सुका ततः इयदेवास्त्वतोऽन्येन किमप्रियेण ते ॥

२५

ल

इति वक्ष्यमाणमरणविषयो निषेधात्मा आक्षेपः तत्र इयदस्तु इत्येतदेवास्तु प्रिये इत्यादिपत्नेन चारुत्वनिबंधनमित्याक्षेपाल
क्षेपमलंकृतं संस्थानम् ॥ उक्तविषयाक्षेपमेव भोः भोः किं सकरं इव पतितस्त्वं यो यकान्यागतिलता इत्युक्तिषित्स्व
मेव खलु मतिः सोऽयं जलं शूद्रते अथानोपनतनामकालस्तुतभांतृक्षोप्रतिकुप्यत सैवलोकाय घिनश्भावमहिमामार्गः पुनर्भ
वः अत्र कश्चित्सेवकः प्राप्यमस्मात्किमिति नश्यति सेभेद इत्यं तविषयमान स्पृहयः केन विहितेश्वना क्षेपेणाधतिबोध्यते तत्रा
क्षेपेण निषेधरूपेणावाच्यस्य सेवासम्बन्धसेवार्तक्षेपफलस्य तत्कृतो हेगात्मन ॥ शांतरसस्याधिभूत निर्वेदविभावानुभावरूप
तयावगमतकृतित्वं वामनस्यतु उपमानाक्षेपश्चाक्षेप इति लक्षणम् उपमानस्य स्वबुद्धादेराक्षेपो स्मिन्नस्य तदाक्षेपेणाक्षेपो स्मि
न्सतीति किं त्वया कृतमिति यथा तस्यास्तन्मुखमस्ति सौम्यसुभगं किंपार्वणेनेंदुना सौंदर्यस्य पदं दृशौ यदि च तैः किं नाम नी
लोत्पलैः किं वा कोमलकांतिभिः किसलयैः सत्येव तत्राधरे ह्ही धातुः पुनरुक्तवस्तुरचनारंभेष्वपूर्वो ग्रहः ॥ अत्र
वर्ण्यापुपमार्थीवाच्यस्य वोपस्कृतने किं तेन कृत्यमिति त्वपहरन्तारोपश्चाक्षेपो व्याख्ययवचमत्कारकारणम् यदि वोपमा
नस्याक्षेपः सामर्थ्यादाकर्षणं यथा पेदूर्धनुः पांडु पयोधरेण शरदा दधानाद्रनखक्षतानाभम् प्रसादयन्तीसकलंकमिंदुं तापं रवे
वैरभ्यधिकं चकारेत्य त्रेर्ष्या कलुषितता यिकां तरमुपमानमाक्षिप्तमपि वाच्याधिमेवालंकारोऽतीति पृथानुसमासोक्तिरेव तदा
ह वाक्येन्योक्तिरिति अत्रैव प्रसिद्धं दृष्टांतमाह अनुरागवतीति तेनाक्षेपेणाप्रमेयसमर्थनमेवपदिसमासमिति निमंतव्य तत्रो
दाहरणेन समासोक्तिः श्लोकः पठितः अहोदैवगतिः कीदृगिति उरूपावनेआदिनिमित्तकोसमागमः इत्यर्थः तस्यैवेतिवा
व्यस्यैवेति यावत् वासनाभिप्रायेणायमाक्षेपो भामहाभिप्रायेण समासोक्तिविषयमुपमायां रूढद्यपेक्षात्वात्समासोक्त्या

पि=२

धन्या
लोप-
२९

द्वयोरिदमेकमेवोदाहरणं व्यस्तरूपकम् ॥ यत्रापि समासोक्तिर्वीरत्नश्राद्धे यो वा किमनेनास्माकं सर्वथाप्यलंकारादिषु
धर्मयं वाच्ये गुणीभवतीति तन्निःसाध्यमित्याशयेनात्र ग्रंथे गुरुभिर्निरूपितः एवं शाथान्यविवक्षायां दृष्टान्तमुक्त्वा व्यपदेशो ग्रंथान्य
कृत एव भवतीत्यत्र दृष्टान्तं स्वयं रसिद्धमाह यथा वेति उपमायाः इति उपमानोपमेयभावस्येमर्थः तथैवस्तु पमयाः दीपके हि आ
दिमध्यान्तविषयं क्रियादीपकमिष्यते इति लक्षणम् तत्र दीपके नैव शोभायया मणिः शाणोल्लीढः समरविजयी हेतिनिहतः
कलाशेषश्चन्द्रः सुरतमृदिता बाललतना मदक्षीणो नागः शरदि सरिदाश्यानपुलिना तनिम्ना शोभन्ते गलितविभवाश्चा
र्थिषु नराः ॥ इत्यत्र दीपकत्वमेव चारुत्वम् अपह्नुतिरपि हस्याकिंचिदं तगैतोपमा तत्रापह्नवे नैव शोभाययया नेयं विशेति
भृंगालीमदेन सुरवरागद्रः अयमाक्रम्यमाणस्य कन्दर्पस्य तृषोर्ध्वमिति एवमादेरपि विचार्य उद्देशक्रमेण वशमेयानरमाह
अनुक्तनिमित्तायामपीति ॥ एकदेशस्य निगमे या गुणान्तरसंस्तुतिः विशेषप्रथनायासौ विशेषोक्तिरिति स्मृता यथा स
एकस्त्रीणि जयति जगन्ति कुसुमायुधः हरतापि तनुं यस्य शंभुना न हृतं बलं इयं वा अस्य न निमित्तेति ता स्यां वा अंगस्य सद्भावः
उक्तनिमित्तायां वस्तुस्वभावमात्रत्वे पर्यवसानमिति तथापि वाङ्ग्यसद्भावशंकायया कर्पूर इव दग्धोपि शक्तिमान्यो जने
जने नमोस्त्ववार्यवीर्याय तस्मै कुसुमधन्वने तेन प्रकारद्वयमवधार्य तत्रनीयं प्रकारमाशंकते अनुक्तनिमित्तायामपीति
वांगस्येति शीतकृतानवल्वार्तिरत्र निमित्तम् इति भट्टोद्भटलक्षणमभिप्रायेणाह तत्त्वत्र काविश्वासारूत्वनिष्पत्तिरिति यत्तु रसि
केऽपि निमित्तं कस्यचित् कान्तासमागमेन मनागपि लब्धुतन्त्वपायं स्वप्नेमन्यमानो निद्रागमनश्रद्धामेको वन्तान् जागरीति
तदपि निमित्तं चारुत्वहेतनया नालंकारत्वाद्भिः कल्पितमपि न विशेषोक्तिभागेव तथाहि लयतीति एवंभूतो विभज्यमा

चिन्त्य

२९

भिव्य=२

श्रा

ननिमित्तोपस्कृतस्याचारुत्वहेतुः अन्यथा विशेषो किंचिन्न भवेत् एवमभिप्रायद्वयमपि साधारणेनाग्रे गुरुकृत्स्वयमुपपत्त न।
त्वोक्तेनैवाभिप्रायेणाग्रे श्लोकव्यवस्थितइतिमन्तव्यं पर्यायोक्तमिति पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते वाच्यवाचकवृ
त्तिभ्यां शून्येनावगमात्मनेति लक्षणम् शत्रुच्छेददृढेच्छस्य मुनेरुत्पथगामिनः। रामस्यानेन धनुषा देशिता धर्मदेशना
इति अत्र भीष्मस्य भार्गवरामाभावाभिभावी प्रताप इति यद्यपि प्रतीयते तथापि तत्सहायेन देशिना धर्मदेशनेत्यभिधीयमा
नेनैव वाच्यार्थोऽलंकृतः अत एव पर्यायेण प्रकारान्तरेणावगमात्मना रूपेणोपलक्षितं सद्यदभिधीयते तदभिधीय
मानमुक्तमेव सत्पर्यायोक्तमित्यभिधीयते इति लक्षणपदम् पर्यायोक्तमिति लक्ष्यपदम् अर्थालंकारत्वं सामान्यलक्षण
वेतिसर्वं बुध्यते यदित्यभिधीयत इत्यस्य बलाद्व्याख्यानमभिधीयते प्रतीयते प्रधानतयेति उदाहरणं च भमधम्मिअ इ
त्यादि तदलंकारत्वमेव हृदये संपन्नमात्मना यो पर्यवसानात् तदा चालंकारमध्ये गणना न कार्या भेदान्तराणि चास्य वक्त
व्यानि तदाह यदि प्राधान्येनेति ध्वनावित्यंतर्भावादात्मैवासौ नालंकारः स्यादित्यर्थः तत्रेति यादृशो लंकारत्वेन वि
वक्षितस्तादृशो ध्वनिर्नोत्तमो भवति न तादृगस्माभिर्ध्वनिरुक्तः ध्वनिर्हि महाविषयः सर्वत्र भावाद्व्यापकः समस्तप्रतिष्ठा
स्थानत्वाच्चांगी न चालंकारो व्यापको न्यालंकारवत् न चांगमलंकार्यतंत्रत्वात् अप्यव्यापकत्वांगित्वे तत्त्वेनोपरम्यते
त्पद्यते चालंकारतानतिरिक्तमत्र पर्यायमवलंब्यते स्वकेवलं मात्सर्यग्रहात्पर्यायोक्तभागिताभावः न चैवं यदपि प्राक्तने
र्दृष्टमपि त्वस्माभिरेवोन्मीलितमिति दर्शयति भामहस्य यादृक्तदीयं रूपमभिमतं तादृगुदाहरणेन दर्शितम् तत्रै
व न व्यंग्यस्य प्राधान्ये चारुत्वहेतुत्वात् तेन तदनुसारितया तत्स्वरूपेयमुदाहरणांतरमपि कस्याने तत्रैव व्यंग्यस्य प्राधा

नपुनरिति

ग

मु ल्लैं

ध्वन्या लोच- २८

17

मिति संगतिः यदि तु तदुक्तमुदाहरणमनात्मभूतमयमिव इत्याद्युदाह्रियते तदस्माभिरिष्यत एव केवलं तन्नयमनवलंब्य।
अर्थश्रवणेनात्मसंस्कार इत्यनार्थचेष्टितम् यदाहुर्वैतिहासिकाः ॥ अवतरणायाप्यवच्छेदाय मृगएव त्वरकमृच्छति भामहेना
प्युदाहृतम् गृहेष्वध्वसु वा नान्नं भुञ्जमहे यदधीतिनो विप्रा न भुञ्जत इति एतद्धि भगवद्वासुदेववचनं पर्यायेण रसदानं नि
षेधति एतत्पर्यायवाह् तस्माद्रसदाननिवृत्तयेऽइति नचास्य रसदाननिषेधस्य कोऽपि स्याः किं विच्छित्तिरस्ति येन शाध्यान्येशंकेन ।
अपि तु तद्व्यंग्यो योऽवृत्तिरविप्रभोजने न विना यद्भोजनं तदेवोक्तप्रकारेण पर्यायोक्तेस्तस्माकरणिके भोजनाद्यम
लंकुरुते न त्वस्य निर्विषभोजनेऽभवतीति विवक्षितमिति पर्यायोक्तमलंकारणं वेनिचिरेतनानामभिमतइति तात्पर्यम
अपह्नुतिदीपकयोरिति एतत्सर्वमेव निर्णीतमन्ततएवाह प्रसिद्धमिति प्रतीतेः प्रसादितं चेत्यर्थः सर्वं चैतदुपमाद्यपदेश
भाजनं यथा न भवतीति अमुया छायया यथा दृष्टांततयोक्रमपदेशाक्रमः सूरिणा यत्र मध्यशब्दो योजयितव्य पुनरपुक्तं व्य
ग्यं शापान्याभावान्न ध्वनिरिति निराकर्तुं पीतवेण वास्तु पुनरेकमेवोपमापापबध्यं रूपत्वेन ध्वनित्वाशंकनात् एतद्विवरण
कदीपकस्य सर्वत्रोपमान्वयो नास्तीति बहुतोदाहरणादेः अपंचेन विस्तारितं वास्तदनुपयोगिनितं तास्य प्रतिबि
बं च (अत एवेनमाह मन्द इत्यादि सुकल्पत्वादित्यंतम्) मदो जनयति प्रीतिं सानंगं मानभंगुरम् सप्रियासंगमोत्कंठां सासम
ह्यं मनसः शुचं ॥ अत्रोपचारोऽनुभजन्यत्वेनाप्युपमानोपमेयभावस्य सुकल्पत्वात् नहि क्रमिकार्णेनोपमानोपमेयभा
वः तथाहि एमइवदशरथो भूद्दशरथइव रघुरजोरघुसदृशः अजइव दिलीपवंशश्चित्रं रामस्य कीर्तिरियमिति न
चभवति तस्मात्क्रमिकत्वे समंवाधाकरणिकत्वमुपमां रुणद्धीति कोऽयं त्रासइत्यलंगर्दभेदोहानुवर्तनेन ॥ २८

वल्

धि

स्

संकरालंकारेपीति विरोधालंक्रियाहेतु समं तत्समसंभवे एकस्य च वचोन्यायदोषाभावेपि संकरस्तिलतण्डुलादेकः प्रका
रः यथा ममैव शशिवदनासितसरसिजनयनासितकुन्दरदशनपंक्तिरियम् गगनजलस्थलसंभवहृद्याकारा कृ
ताविधिनेति अत्र शशीवदनमस्याः तद्वदावदनमस्या इति रूपकोपमोल्लेखोयुगमनुयासंभवादेकतरपक्षत्यागग्रह
णप्रमाणाभावात्संकर इति व्यंग्यवाच्यतायाप्यवानिश्चयात्काव्यनिसंभावना योपिद्वितीयः प्रकारः शब्दार्थालंकाराणा
मेवात्रभाव इति तत्रापि प्रतीयमानस्य काशंका यथा स्मरस्मरमिव प्रियेन रमसे यदालिंगनादिति यत्रैव यमकमुपमा
च तृतीयः प्रकारो यत्रैकत्र वाक्यांशे अनेकार्थालंकारः तत्रापि द्वयोः साम्यादेकस्य व्यंग्यता यथा तस्या दयावसानत्वा
न्नेत्रे प्रतिभास्वति वासायवासरः कांतो विशतीव तमो गृहामिति अत्र हि स्तामि विपत्तिसमुचित व्रतग्रहणे हे वा कि
उत्पत्रक रूपणमेकदेशविवर्ति रूपकं दर्शयति उत्प्रेक्षा चेवशब्देनोक्ता तदिदं प्रकारद्वयमनुक्रमं। शब्दार्थवर्त्म्यलं
कारा वाक्यएकत्र भाविनः संकरो वैकवाक्यांशप्रवेशाद्वाभिधीयत इति ॥ चतुर्थस्तु प्रकारो यत्रानुग्राह्यानुग्राहक
भावो ऽलंकाराणां यथा ॥ प्रवाननीलोत्पलनिर्विशेषमधीरविप्रेक्षितमायताक्ष्या तया गृहीतं नु मृगांगनाभ्यस्ततो गृही
तं नु मृगांगनाभिः ॥ अत्र मृगांगनावलोकनेन तदवलोकनस्योपमा यद्यपि व्यंग्या तथापि वाच्यस्य संदेहालंकारस्याभ्यु
त्थानकारित्वेनानुग्राहकत्वाद्गुणीभूता अनुग्राह्यता। न हि संदेहे पर्यवसानं। यथोक्रमं। परस्परोपकारेण यत्रालंकृतय
स्थिताः स्वातंत्र्येनात्मलाभं नो लभंते सोपि संकरः ॥ तदाह यत्रालंकारद्वयादि एवं चतुर्ष्वपि प्रकारेषु ध्वनितानिराकृता
मध्यमयोस्तु व्यंग्यसंभावनैव नास्तीत्युक्तं आद्ये न प्रकारे शशिवदनेत्यत्र दृष्टान्ते कथंचिदस्ति संभावनेत्याशंक्य निराक

भवतिन गुणानुरागे खलानां केवलं प्रसिद्धि शरणानाम् । चन्द्रेणाप्रियामुखेदृष्टे इति संस्कृतम्

ध्वन्या
लोप्र.
२८

अलंकारत्वेयेति सममिति द्वयोरप्यान्दोल्यमानत्वादितिभावः ननु यत्र व्यंग्यमेव प्राधान्येन भाति तत्र किं कर्तव्यं
यथा हेउगुणगुणगुणतेवलाणलावयंपसिनिसरणाः हेपणोकुश्रउसमसिमणिवात्मणसिश्रासदेदिद्वे २५ ॥ ॥
अत्रार्थान्तरन्यासस्यावद्याच्यत्वेनाभानि व्यतिरेकापह्नुतीतु व्यंग्यत्वेन प्रधानतयेत्यभिप्रायेण शंकते अथेति तत्रे

ॐ अलंकारद्वयसंभावनायां तु वाच्यव्यंग्ययोः समं प्राधान्यम् अथवा व्योपसर्जनीभावेन व्यं
ग्यस्य तत्रापि व्यवस्थानेन तदा सोपि ध्वनिविषयोस्तु न तु स एव ध्वनिरिति वक्तुं शक्यं पर्यायोक्तनि
र्दिष्टन्यायात् २८ ॐ अपि च संकरालंकारस्य संकरोक्तिरेव ध्वनिसंभावनां निराकरोति २७॥

न्तरं तदा सोपीति संकरालंकारएवायं न भवति अपि त्वलंकारध्वनिनामायं ध्वनेर्द्वितीयोभेदः यथा पर्यायोक्ते निरूपितं
तत्सर्वमत्राप्यनुसरणीयं अथ सर्वेषु संकरप्रभेदेषु व्यंग्यसंभावनानिरासप्रकारं साधारणमाह अपि चेति २८ ॥ क्व
चिदपि संकरालंकारेवेति सर्वत्र्यः सर्वेभेदमिश्रा इत्यर्थः संकीर्णतामिश्रत्वं सोसौ भावस्तत्र कस्यैकस्य प्राधान्यं दीरज

२८

अधिकारादपेतस्य वस्तुनोऽन्यस्य या स्तुतिः । अप्रस्तुतप्रशंसा सा त्रिविधा परिकीर्तिता । अप्रस्तुतस्य वर्णनं प्रस्तुताक्षेपिणी ह्यस्य अर्थ
सद्भावे प्रस्तुतविधेये भवति सामान्यविशेषभावान्निमित्तनिमित्तिभावात्सारूप्याच्च तत्र प्रथमे प्रकारद्वये प्रस्तुताप्रस्तुतयोस्तुल्य
मेव प्राधान्यमिति प्रतिज्ञां करोति अप्रस्तुतेत्यादिना प्राधान्यमित्यन्तेन तत्र सामान्यविशेषभावेपि द्वयोर्गतिः सामान्यमप्र

अप्रस्तुतप्रशंसायामपि यदा सामान्यविशेषभावान्निमित्तनिमित्तिभावाद्वाभिधेयप्रतीयमानयोः सम
मेव प्राधान्यं यदा तावत्सामान्यस्याप्रस्तुतस्याभिधीयमानस्य प्राकरणिकेन विशेषेण प्रतीयमानेन सं
बन्धस्तदा विशेषप्रतीतौ सत्यामपि प्राधान्येन तत्सामान्येन विनाभावात्सामान्यस्यापि प्राधान्यं
यदापि विशेषस्य सामान्यनिष्ठत्वं तदापि सामान्यस्य प्राधान्ये सामान्ये सर्वविशेषाणामन्तर्भावा
द्विशेषस्यापि प्राधान्यं निमित्तनिमित्तिभावे चायमेव न्यायः यदा तु सारूप्यमात्रवशेनाप्रस्तु
तप्रशंसायामप्रकृतप्रकृतयोः संबन्धस्तदाप्यप्रस्तुतस्य सरूपस्याभिधीयमानस्य प्राधान्यस्याविव
क्षायां ध्वनावेवान्तःपातः इतरथा त्वलंकारान्तरत्वमेव तदयमत्र संक्षेपः ॥ २८ ॥

प्राकरणिकेशब्देनोच्यते गम्यते तत्प्राकरणिको विशेषः स एकः प्रकारः यथा अहो संसारनैर्घृण्यमहो दौरात्म्यमापदाम्
अहो निसर्गजिह्मस्य दुरन्ता गतयो विधेः ॥ अत्र हि दैवस्यानन्तं सर्वत्र सामान्यरूपमप्रस्तुतं वर्णितं सर्वत्र प्रकृते वस्तुनि ।
क्वापि विनष्टे विशेषात्मनि पर्यवस्यति न चापि विशेषांशस्य सामान्येनाव्याप्तत्वाद्यस्य विशेषवद्वाच्यस्य सामान्यस्या
पि प्राधान्यं न हि सामान्यविशेषयोर्गुणप्रधानभावो विभाव्यते यदा तु विशेषो प्राकरणिकः प्राकरणिकं च सामान्यमादि

ध्वन्या· लोच· २९

यति तत्र द्वितीयः प्रकारः यथा ॥ एतत्तस्य मुखात्कियत्कमलिनीपत्रे कणं पाथसो यन्मुक्तामणिरित्यमंस्त स जडः शृण्वन्य
दस्मादपि अङ्गुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनैस्तत्रोड्डीय गतो ममेत्यनुदिनं निद्राति नान्तः शुचा ॥ अत्रास्थाने म
हत्त्वसंभावनं सामान्यमप्रस्तुतं अप्रस्तुते तु जलबिन्दौ मणित्वसंभावनं विशेषरूपं वाच्यम् तत्रापि सामान्यविशेषयोर्द्वयोरप्यथा
न्येन विरोधः इत्युक्तम् एकमेकः प्रकारो द्विभेदो विवादिनः यदा तावदित्यादिना विशेषस्यापि प्राधान्यमित्यनेन ॥ एवमेवान्यायं
न्यं निमित्तनैमित्तिकभावेति दिशं तस्यापि द्विप्रकारतां दर्शयति कदाचिन्निमित्तमप्रस्तुतं सदभिधीयमानेन नैमित्तिकं प्र
स्तुतमाक्षिपति यथा ये यान्त्यभ्युदये प्रीतिं नोज्झन्ति व्यसनेषु च ते बान्धवास्ते सुहृदो लोकः स्वार्थपरोऽपरः ॥ अत्राप्र
स्तुतेन सम्बन्धो बान्धवरूपत्वं निमित्तं सत्त्वावसेयो वर्णयति नैमित्तिकी श्रद्धेयवचनता प्रस्तुता मान्यमेनोऽभिव्यङ्क्तुम् तत्र नैमि
त्तिकप्रतीतावपि निमित्तप्रतीतिरेव प्राधान्येनावभासते प्राणकत्वेनेति वाच्यव्यङ्ग्ययोः प्राधान्यं कदाचिन्नैमित्तिकमप्र
स्तुतं वर्ण्यमानं प्रस्तुतं निमित्तं व्यनक्ति यथा सेतौ ॥ सग्गे अपारिजाअं कोत्थुहलच्छिविरहिअं महुमहस्स उरम्
सुमरामि महणपुरओ अमुद्धअन्दं च हरजडापब्भारम् ॥ अत्र जाम्बवान् कौस्तुभलक्ष्मीविरहितं हरिवक्षः स्मर
णादिकमप्रस्तुतं नैमित्तिकं वर्णयति प्रस्तुतं तु वृद्धतामेव चिरजीवित्वव्यवहारकौशलादिनिमित्तभूतं मतिना
यामनुपादेयभूतायामभिव्यङ्क्तुम् तत्र निमित्तप्रतीतावपि नैमित्तिकं वाच्यभूतं प्रस्तुतं तन्निमित्तान्तप्राणितेनोद्भवकल्पितरी।
करोत्यात्मानमिति समप्राधान्यमेव वाच्यव्यङ्ग्ययोः ॥ एवं द्वौ प्रकारौ प्रत्येकं द्विविधौ ॥ किंचायं तृतीयः प्रकारः परोक्ष्य तत्सा
रूप्यलक्षणः तत्रापि द्वौ प्रकारौ अप्रस्तुतात्कदाचिद्वाच्याच्चमत्कारः व्यङ्ग्यं न तन्मुखप्रेक्षम् यथास्मदुपाध्यायभट्टेन्दुराजस्य

त्व

संबोधनम्

शाणायेन समर्पितास्तवकत्वाद्येन त्वमुत्थापितः स्कंधे यस्य चिरं स्थितोऽसि विदधे यस्ते सपर्यां गुरुः तस्यास्य स्मितमात्रकेण जनयन्
जीवापहारं क्रियां भ्रातः प्रत्युपकारिणां धुरि परं वेतालली लायसे ॥ अत्र यद्यपि मात्रप्यवशो न कश्चनद्यः कश्चित्स्तः प्रस्तुत आदि
ष्टेन तथाप्यप्रस्तुतस्यैव वेतालस्यात्र न स्वचमत्कारकारित्वं तस्येचेतनालंबवदसंभाव्यमानोऽयमर्थो न च स्फुरति इति वाच्यस्यात्र
प्रधानता यदि तु न वचेतनादित्वेनासंभाव्यमानतदर्थविशेषणेनाप्रस्तुतेन वर्णितेन प्रस्तुतमाहिप्यमाणं चमत्कारकारि
तदा वस्तुध्वनिरसौ यथा ममैव भावत्रातहृदा जुन स्फुरद्यान्याक्रम्य यत्रेतरन्यंगीभिर्विविधाभिरात्मस्फुरद्यप्रच्छाद्य संक्रीडसे
स त्वामाह जडं ततः स हृदयं मन्येत दुःशिक्षितो मन्ये मुग्धजडात्मतास्तुतियदं त्वत्साम्यसंभावनात् ॥ कश्चिन्महापुरुषो वीतरा
गोऽपि सरागवदिति न्यायेन गाढविवेकालोकतिरस्कृततिमिरप्रतानोऽपि लोकमध्ये स्वात्मानं प्रच्छादयंल्लोकं च वाचालय
त्रात्मन्यप्रतिभामेवांगीकुर्वंस्तेनैव लोकेन मूर्खोऽयमिति यदावज्ञायते तदा तदीयं लोकोत्तरं चरितं प्रस्तुतं ध्वन्यते याप्रायान्ये
न प्रकाश्यते जडोऽयमिति स्फुरद्यान्न त्वादिभावो लोकेनावज्ञायते सचप्रश्न न कस्य चिद्धृद्धिरेण उन्मत्तका चिन्ताहृयमान
मानसतामन्यस्य प्रयत्नैषपरवशतांकरोतीति इत्यादेव लोकं यच्छं लोकैर्विकारकारणं नैर्नेतयति न तत्स्फुरद्दृदयेऽकेनापि
ज्ञायते कीदृगयमिति यत्तु तमहागंभीरोऽतिविदग्धः स्पृशगर्वहीनोऽतिशयेन क्रीडावतरः सपदि लोके न जडोऽस्तीति न त
एवकारणात्मन्तु न वैरग्यसंभावनातिमित्रात्संभावितः प्रात्मावृत एवकारणात्प्रस्तुतज्ञाडेन संभाव्यः तत एव स हृद
यः संभावितस्तदस्य लोकस्य जडोऽसौ नियपुच्यते तदाज्ञात्वमेव विषयस्वभावत्वात्स्यातिविदग्धस्य प्रसिद्धमिति साधस्तुते
स्तुतिरितिजडात्तदपि यापीयानयं लोक इति ध्वन्यते तदाह यत्राविन्यादि इतरथान्विति इतरथैवं उत्तरसंकारांतंतेनैवत्वमल

ध्ये करसादिभिर्न

पः

स

मुग्धानेदूदयादि:

३

नु॰

ध्वन्या लो प्र ३

कारविशेषणत्वं न व्यंग्यस्य कथंचिदपि प्राधान्यमिति भावः। उद्देशे यद्यपि ग्रहणं कृतं समासोक्त्यादिद्वंद्वे तेन व्याजस्तुति
प्रभृतिरलंकारवर्गोऽपि संभाव्यमानव्यंग्यप्राधान्यलेशः संभावितः। तत्र सर्वत्र प्राधान्यमत्र देशान्तमुपक्रमते तत्प्रथमत्रेति कियद्वा
प्रतिपदं लिख्यतामिति भावः। तत्र व्याजस्तुतिर्यथा॥ किं वृत्तान्तैः परगृहगतैः किंतु नाहं समर्थस्तूष्णीं स्थातुं प्रकृतिमुखरो दा
क्षिणात्यस्वभावः। गेहे गेहे विपणिषु तथा चत्वरे पानगोष्ठ्यामुन्मत्तेव भ्रमति भवतो वल्लभा हन्त कीर्तिः॥ अत्र व्यंग्यस्तुत्यात्मको यत्र
त्वाच्यमेवोपस्क्रियते यत् दाता त्वं केनचिदिति॥ आसीन्नाथ पितामही तव मही माता ततोऽनन्तरं माता संप्रति साम्बुराशिरशना जाया
कुलोद्भूतये पूर्णे वर्षशते भविष्यति पुनः सैवानवद्या स्नुषा युक्तं नाम समग्रनीतिविदुषां किं भूपतीनां कुले इति तदस्माकं
ग्राम्यं प्रतिभाति अत्र त्वं तासत्[स्य]स्तुतिर्हन्त नात् काचानेन स्तुतिः कृता त्वं वंशक्रमेण राजेति द्विकियदिदमित्येवं प्राधान्याद्व्याजस्तु
तिः सहृदयगोष्ठीनिर्मितेस्तत्यैव यस्य विकारः प्रभवन्प्रतिबद्धं वहेतुना येन गमयति तदभिप्रायं तत्त्वेति वद्धे भावो साबि
ति अत्रापि वाच्यप्राधान्ये भावालंकारता॥ यस्य चित्तवृत्तिविशेषस्य संबंधी वाग्व्यापारादिर्विकारो प्रतिबद्धो नियतः प्रभवेत्त
चित्तवृत्तिविशेषरूपमभिप्रायं येन हेतुना गमयति सहेतुर्यथेष्टोपभोगपरत्वादिलक्षणः भावालंकारः एकाकिनी यदब
ला तरुणी तथाहमस्मद्गृहे गृहपतिश्च गतो विदेशम्। कं याचसे तदिह वासमियं वराकी श्वश्रूर्ममान्धबधिरा ननु मूढ पा न्थ
न्थ॥ अत्र व्यंग्यमेकैकत्रपदार्थोपस्कारकारीवाच्यं प्राधान्येन व्यंग्यं प्राधान्येन तु न कदाचिदलंकारतेति निरूपितमित्यलं
बहुना॥ तत्प्रथमत्रसंक्षेपः २८॥

दि

हि भावालं

ये उपस्करोति

३

यत्रेति काव्ये स्वलंकृतत्य इति स्वलंकृतितादेव वाच्योपस्कारकत्वम् प्रतिभामात्र इति यत्रोपमादौ श्लिष्टा प्रतीतिः वाच्या

ङ्ग्यं ग्यस्य यत्राप्राधान्यं वाच्यमात्रानुयायिनः समासोक्त्यादयस्तत्र वाच्यालंकृतयः स्फुटाः ॥ व्यं
ग्यस्य प्रतिभामात्रे वाच्यार्थानुगमेऽपि वा न ध्वनिर्यत्र वा तस्य प्राधान्यं न प्रतीयते तत्परावेव शब्दा
र्थौ यत्र व्यंग्यं प्रति स्थितौ ध्वनेः स एव विषयो मन्तव्यः संकरोज्झितः ॥ तस्मान्न ध्वनेरन्यत्रान्तर्भा
वः इतश्च नान्तर्भावो यतः काव्यविशेषोऽङ्गी ध्वनिरिति कथितः तस्य पुनरङ्गानि अलंकारा गुणा वृ
त्तयश्चेति प्रतिपादयिष्यन्ते न चावयव एवावयवीति प्रसिद्धः अपृथग्भावे तु तदङ्गत्वं अपृथग्भूतानां तु त
स्य न तत्त्वमेव यत्रापि वा तत्त्वं तत्रापि ध्वनेर्महाविषयत्वान्न तन्निष्ठत्वमेव २९ ॥

पृथग्भूतो   त्वं तस्य न तु

गं

र्थानुगम इति वाच्येनार्थेनानुगमः समं प्राधान्यं समप्रस्तुतप्रशंसायामिवेत्यर्थः न प्रतीयत इति स्फुटतया प्राधान्येन

31

लो च्योत्य

वकास्यापि तद्बलात्कल्प्यते तथापि चमत्कृतये नानुप्रविशति यथा ॥ देव्यापमित्यत्रप्राणिस्वलापस्वसंज्ञान्यक्तानां स्वावाख्यासन्ने
नचतत्रप्रकारेश ध्वनिव्यवहारसङ्गावेपि व्यंग्यस्य प्राधान्यम् अप्राधान्येन क्लिष्टत्वतोवाच्येनसमप्राधान्यस्फुटे प्राधा
न्येत्युक्तं तर्हि समासोक्त्यादि तत्रवावेवेति संकरेणालंकारान्तरप्रवेशसंभावनयाउक्तितइत्यर्थः संकरालंकारेणापि तत्सत
प्रत्यालंकारोपलक्षणेवेद्वित्तिश्ले स्यात् इत्याहेति न केवलमन्येन विरुद्धवाच्यवाचकभावव्यंग्यव्यंजकभावसमाश्रयत्वा
त्. नतादात्म्यमलंकारान्तरेण ध्वनेश्च यावत्स्वाभ्यभृत्यवदंगिगत्वेनाङ्गत्वयोर्विरोधादित्यर्थः अवयवइत्येकेकस्याह तदा
ह पृथग्भूतइति अपृथग्भूतस्तथा माभून्समुदायपतितत्वं स्यात्तु तइत्याशंक्याह पृथगभावेत्यादि तथापि तत्रपक
एव समुदायोन्येषामपि समुदायिनां तत्र भावात् तत्समुदायमध्ये च प्रतीयमानमप्यस्ति तत्तदलंकाररूपं प्रधानत्वा
देव यत्रालंकाररूपेन तदप्रधानत्वान्न ध्वनिः तदाह न तत्र च मेवेति न तु लंकारएव कश्चित्तयाप्रधानताभिषेकं दत्वा ध्व
निरित्यात्मेति चोक्तस्याशंक्याह पर्यायेवेति नहि समासोक्त्यादीनामन्यतमपवसेन तथास्माभिः कृतः तद्विवि
क्ताववेपि तत्स्वभावात् समासोक्त्याद्यलंकारस्वरूपस्य सम तस्याभावेपि तत्प्रदर्शितत्वात् अत्राह इत्येति कः सवा
णेति तदाह न तत्र च विशिष्टमेवेति २५ ॥

विरुद्धपक्षेति विरुद्धस्य उपन्यासप्रथमम् उपक्रमो यस्य तदुक्तेरिति बहुव्रीहिः । तेनोपक्रान्तोपक्रममिति तत्पुरुषाश्रयं न युक्तं निरव
काशं श्रूयमाणेष्विति श्रोत्रशष्कुलीसंतानेनागताः शब्दाः श्रूयन्ते तस्मादिति प्रक्रियायां शब्दजाः श्रूयमाणा इत्युक्तं तेषां च वर्णा
नुरणनरूपं तेनावदाति तेच ध्वनिशब्देनोक्ताः यथाह तत्रभगवान्भर्तृहरिः ॥ यः संयोगविभागाभ्यां करणैरुपजन्यते ।
स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः ॥ एवं वर्णादिनिर्ह्रादस्थानीयोऽनुरणनात्मोपलक्षितो व्यङ्ग्योऽप्यर्थो ध्वनिरिति

ऽस्त्विति सूरिभिः कथितः इति विरुद्धपक्षोपमाक्तिः ननु यथा कथंचित् सदृशैरिति प्रतिपाद्यते प्रथमे हि विद्वांसो
वैयाकरणाः व्याकरणमूलत्वात्सर्वविद्यानाम् ते श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति तथैवान्यै।
स्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसंमिश्रशब्दात्मा काव्यमिति व्यपदेशेन
व्यंजकत्वसाम्याद्ध्वनिरित्युक्तः न चैवंविधस्य ध्वनेर्वक्ष्यमाणप्रभेदतद्भेदसंकलनया महाविषय
स्य प्रकाशनं तत्र प्रसिद्धालंकारविशेषमात्रप्रतिपादनेन तुल्यमिति तद्भावितचेतसां युक्त
एव संरंभः न तेषु कथंचिदीर्ष्याकलुषितशेमुषीकत्वमाविष्करणीयम् ३ ॥

व्यवहरन्तः तथा श्रूयमाणा ये वर्णा नादशब्दवाच्या अन्त्यबुद्धिनिर्ग्राह्यस्फोटाभिव्यंजकास्ते ध्वनिशब्देनोक्ताः यथाह भग
वान्स एव ॥ प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते इति तेन व्यंजकौ शब्दार्थाव
पीह ध्वनिशब्देनोक्तौ किंच वर्णेषु तावन्मात्रपरिमाणेष्वपि सत्सु यथोक्तमस्त्वीयसापि यत्नेन शब्दस्मारितेमतिः

यदिवानैवगृह्णातिवर्णंवासकलंस्फुटमिति तेषुतावत्स्वेष्वेवस्फुटमालोच्यवर्णेषुयोन्योद्भूतविलंबितादिभेदात्मा प्रसिद्धाद्
स्माद्वर्णादिव्यापाराद्भ्यधिकः सव्यापारोध्वनिरुक्तः यत्प्राह सएव शब्दस्फोटमभिव्यक्तौ द्विविभेदं तत्त्वेक्तताः ध्वनयः समुपो
ह्यन्ते स्फोटात्मा तैर्नैनभिद्यतइति ॥ अस्माभिरपिप्रसिद्धेभ्यः शब्दव्यापारेभ्योभिधातात्पर्यलक्षणारूपेभ्योतिरिक्तो व्या
पारोध्वनिरित्युक्तः एवंचलक्षणमपिध्वनिः तद्योगात्समस्तमपिकाव्यंध्वनिः तेनव्यतिरेकाव्यतिरेकोव्यपदेशोपिनयुक्तः
वाच्यवाचकसंमिश्रइति वाच्यवाचकसहितः संमिश्रइति मध्यमलोपीसमासः गामश्वंपुरुषमितिवत्समुच्चयो
त्रचकारेणविनापितेनवाच्योपिध्वनिः वाचकोपिशब्दोध्वनिः द्वयोरपिव्यंजकत्वंध्वननिवभावात् संमिश्रितेविभावा
नुभावसंवलनयेतिव्यंग्योपिध्वनिः ध्वन्यतइतिकृत्वा शब्दनंशब्दः शब्दव्यापारेणचापिध्वनिः उक्तप्रकारध्वनिचतुष्टय
त्वात् अतएवसाधारणहेतुमाह व्यंजकत्वसाम्यादिति व्यंजकत्वंव्यंजकभावः सर्वेषुपक्षेषुसामान्यरूपः साधारणहे
त्वर्थः यत्तुनरेतदुक्तं वाग्विकल्पानामानन्त्यादित्यादि तत्परिहरति नचैवंविधस्येति वक्ष्यमाणः प्रभेदोयथा मुलेद्वि
रूपे तद्भेदायथा अर्थान्तरसंक्रमितवाच्योत्यन्ततिरस्कृतवाच्यइत्यविवक्षितवाच्यस्य असंलक्ष्यक्रमव्यंग्यः क्रमव्यंग्य
इतिविवक्षितान्यपरवाच्यस्येति तत्राप्यवान्तरभेदाः महाविषयस्येति अशेषलक्ष्यव्यापिनइत्यर्थः विशेषणद्वयेना
व्यापकत्वमाह मात्रपदेनांगित्वाभावात् तत्रध्वनिस्वरूपेभावितंप्रणिहितंचेतोयेषामतएवचमत्काररूपेणभावि
तमधिवासितमतएवमुकुलितलोचनत्वादिविकारकारणंचेतोयेषाम् ३० ॥

सो आभिधारूपः अपितात्पर्यरूपः सोपिध्वननात् ध्वनिः काव्यमिति व्यपदेश्यश्चयोर्थः सोपि=

सं लक्ष्य =२ ३२

वाच्यांश्रितमाविषये

अभाववादिन इत्यवान्तरप्रकारत्रयभिन्ना अपीत्यर्थः। तेषां प्रत्युक्तौ फलमाह अस्तीति। उदाहरणपृष्ठे भाक्तत्वमलक्ष्यं
कं स्वपरिहार्यं च भवतीत्यभिप्रायेणोदाहरणावकाशार्थं भक्तिवादलक्षणीयत्वे प्रथमं परिहरणीयेऽपि प्रति अ
निर्देशमात्रमभविष्यदुद्देशेनानुवादानुसारेणोत्तरत्र तद्भेदनिरूपणं करोति अस्तीति पंचधा ध्वनिशङ्कायेनय

ॐ तदेवं ध्वनेस्तावदभाववादिनः प्रत्युक्ताः अस्ति ध्वनिः। स चाविवक्षितवाच्यो विवक्षितान्यपरवा
च्यश्चेति द्विविधः सामान्येन। तत्राद्यस्योदाहरणम्॥ सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्॥ १३॥

सावक्ष्यते

त्रयस्तावदयं श्लोक इति बहुव्रीह्यर्था द्रव्ये पुरुषा यथोचितं समानाधिकरण्येन प्रयोजनम्। वाच्योऽत्र ध्वनौ वाच्यशब्देन स्वात्मनेनावि
वक्षितो प्रधानीभूतः स्वात्मा येनेति अविवक्षितवाच्यो व्यंजकोऽर्थः। विवक्षितान्यपरवाच्योऽपि यदि वा कर्मधारयः। अर्थे त्र

ध्वन्या-
लोच
३३
33

पदेष्वविवक्षितस्वार्थो वाच्यस्येति तत्रायमर्थः कदाचिदनुपपद्यमानत्वादिना निमित्तेनाविवक्षितो भवति कदाचित्तूपपद्यमान
इति कृत्वाविवक्षितः पदव्यङ्ग्यपर्यन्तं प्रतीतिं स्वसौभाग्यमहिम्ना करोति अत एवार्थान्तरसंक्रमितत्वेनास्य व्यञ्जकः पूर्वोक्तः शब्दः ननु व
विवक्षा वाच्यपरत्वं चेति विरुद्धम् अन्यपरत्वेनैव विवक्षणात्को विरोधः सामान्येति वस्तुलंकाररसात्मना हि त्रिभेदो विध
निरूपणाभ्यामेवाभ्यां संगृहीत इति भावः ननु तन्नामप्रदेशे यतन्नामनिवेशनस्य किंफलम् उच्यते प्रभेदमहिम्ना महद्येन ध्वन
नात्मनि व्यापारे पूर्वं प्रसिद्धाभिधातात्पर्यलक्षणात्मकव्यापारत्रितयावगतार्थप्रतीतेः प्रतिपत्तृगततायाः प्रयोक्तृभि
प्रायरूपायाश्च विवक्षायाः सहकारित्वमुक्तमिति ध्वनिस्वरूपमेतन्नामाभ्यामेव प्रोज्झितम् स्तवर्णयिष्यामिति स्तव।
र्णयिष्यतीति स्तवर्णयिष्याप तच्छ्रवाकामेवासंभवत्स्वार्थमिति कृत्वाऽविवक्षितवाच्यम् ततएवपदार्थमभिधा
यान्वयं च तात्पर्येणावगमय्यैव बाधकवशेन तमपहायसाहचर्यात्स्वलक्षम् वृद्धिसंभारभाजनतां लक्षयति तल्लक्ष
णाप्रयोजनं स्फुरत्कनविधिसेव्यानां प्राशस्त्यम् शब्दवाच्यत्वेन गोप्यमानं सत्त्वाधिकाञ्चकलशयुगलमिव महार्घतां
नुपतयद्वस्तत इति शब्दो व्यवधानतया व्यंजकोऽर्थस्तु तत्सहकारितयेति चत्वारो व्यापाराः ३१ ॥

शिखरिणीति

प्रभु

न हि निर्विघ्नो मम सिद्ध्योपि श्रीपर्वतादयदमांसिद्धिं विदुषः दिव्यकल्पसहस्रादिस्वाप्नपरिमितः कालः तथैवं वियोगासफलत्वेन यत्तवाग्निप्रभृत्यपि तपः तम तवेति भिन्नपदं समासेन विगलितनयासानुप्रतीयते तव दशतीत्यभिप्रायेणानेन यदाङ्कूर्त्तं तानुरोधत्वात्तदध्धरपाटलत्वमिति निरुक्तमिति तदसदेवदशतीत्यास्वादयत्यपि विच्छिन्नसर्वं पनयानतौ दत्विक व्रतत्वं सिद्धिकेयत्तरसं सोढेति तथाभिवदेवरसत्वतायस्य तपः प्रभावादेवेति शुकशावक इति तारुण्याद्युचितकालत्वाभावेपि तपसपदेति स्वानुरागिण्यस्य प्रच्छन्नस्याभिप्रायव्योपनवैदग्ध्यचाटुविरचनात्मकविभावोन्मीलनं

ॐ द्वितीयस्यापि ॥ शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः । तरुणि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः ॥ ३२ ॥

किमभिधानमिति

गम्यं स्वचवचनपदव्यापारः अभिधानात्पर्यध्वननं चेति मुख्यार्थबाधाद्यभावे मध्यमकक्ष्यायां लक्षणायास्तृतीयस्याभभावात् यद्विवाश्नाकस्मिकविशिष्टप्रशार्थानयपत्तेर्मुख्यार्थबाधायां सादृश्याल्लक्षणाभवतु मध्ये तस्याः प्रयोजने ध्वन्यमानमेव तत्तुर्यकक्ष्यानिवेशि ने केवलं सर्वत्र लक्षणेवमथाते ध्वननव्यापारसहकारिद्वाभिधातात्पर्यशक्तीवाक्यार्थसौंदर्यादेव व्यंग्यप्रतिपत्तेः केवलं लेशेन लक्षणाव्यापारोपयोगो नास्तीत्यलं असंलक्ष्यक्रमव्यङ्ग्येन लक्षणासमुद्देशमात्रेणास्मि असंलक्ष्यत्वादेव क्रमस्येति वक्ष्यामः नेन द्वितीये पि भेदे चत्वारो व्यापाराः प्रतयवोभयो

न्मेष त्वमपि

प्य

वाच्येति=१

अत्रोक्तप्रकार इति पंचस्वर्थेषु योज्यम् शब्देऽर्थे व्यापारे व्यंग्ये समुदाये च रूपभेदं दर्शयितुं ध्वनेस्तावद्रूपमाह ३३ ॥
भक्तिश्च ध्वनिश्चेति किं पर्यायवदैक्यम् अथ पृथिवीत्वमिव पृथिव्या अत्यव्यापकधर्मरूपतया लक्षणम् तत्त्रयमप्युक्तं
निराकरोति तात्पर्येणाविश्रान्तिधाम्ना या प्रयोजनत्वेनेति यावत् प्रकाशने द्योतनमित्यर्थः उपचारमात्रमित्युपचारो गुण

यद्यप्युक्तं भक्तिर्ध्वनिरिति तत्त्वतिसमाधीयते ॥ भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः ॥ अयमुक्त
प्रकारो ध्वनिः भक्त्या नैकत्वं बिभर्ति भिन्नरूपत्वात् ३३ ॥ वाच्यव्यतिरिक्तस्यार्थस्य वाचवाचकाभ्यां तात्प
र्येण प्रकाशनं यत्र स ध्वनिः उपचारमात्रं तु भक्तिः ३४ ॥

वाच्य=१

वृत्तिर्लक्षणा उपचरणमतिशयितो व्यवहार इत्यर्थः मात्रशब्देनेदमाह यत्र लक्षणाव्यापारात् तृतीयादन्यस्तुर्यः प्रयोज
नद्योतनात्मा व्यापारोऽवस्तु वस्तुस्थित्यासंभवन्नपि अनुपयुज्यमानत्वेनानाद्रियमाणत्वात् सत्कल्पोऽयमर्थमधिकृत्येति हि
प्रयोजनलक्षणम् तत्रापि लक्षणालौकिकार्थं तल्लक्षणा वेनिध्वननं एकं तत्त्वं स्यात् द्वितीयपक्षं दूषयति ३४ ॥

प्रस्तावितिध्वनिः । तत्रैतदिति भक्त्यानुध्वननमवश्यंभावीति कथं तद्व्यतिरिक्तोऽस्ति विषय इत्याह महत्सौष्ठवमिति अत एव
प्रयोजनस्यानादरणाद्व्यञ्जकत्वेन तत्कृतं सौष्ठवं किंचिदिति भावः । महत्त्वग्रहणेन गुणमात्रं न तद्भवति यथोक्तम् समाधिर

ॐ तत्रैतत्स्याद्भक्तिर्लक्षणं ध्वनेरित्याह ॥ अतिव्याप्तेरथाव्याप्तेर्न चासौ ल
क्ष्यते तया ॥ न च भक्त्या ध्वनिर्लक्ष्यते कथम् अतिव्याप्तेः अव्याप्तेश्च त
त्रातिव्याप्तिः ध्वनिव्यतिरिक्तेऽपि विषये भक्तेः संभवात् यत्र हि व्यञ्जक
त्वकृतं महत्सौष्ठवं नास्ति तत्राप्युपचरितशब्दवृत्त्या प्रसिद्ध्यनुरोधप्रव
र्तितव्यवहाराः कवयो दृश्यन्ते ३५ ॥

स्य धर्मस्य क्वाप्यारोपो विवक्षित इति दर्शयति ननु प्रयोजनाभावे कथं तथा व्यवहार इत्याह प्रसिद्ध्यनुरोध इति परम्प
रया तथैव प्रयोगात् एवं तत्र मः प्रसिद्धिर्या प्रयोजनस्यानिरूपणे त्वर्थः उद्यानेनापि रूपेण तत्प्रयोजनेच्छा सर्वत्र तां

धृत्वा
लोभ०
३५

वदतीत्युपचारे हि स्फुटीकरणशक्तिपत्तिः प्रयोजनं यद्यप्येकं स्वशब्देनोच्यते किमयासक्तं स्यात् सूचनयावर्णने तु किं चारु
त्वमधिकं जानमते नैवाशयेन वक्ष्यति यत्र ड्यान्तरेण शब्दं यदीति अहं हि जर आलिङ्ग्यते पुनः मितयनपादेयताल
क्ष्यते उत्कार्थस्यासंभवात् ऊर्ध्वतायमत्राउपकृदिनवदनाविहसंतम् यथा गृहीतास्तदीयस्त्यं हरंति सैविशेषमहिलाः

यथा परिधाने पीनस्तनजघनसंगाद्भयतस्तनोमध्यस्यांतः परिमलनमशाप्यहरितम् इदं
व्यस्तन्यासे स्वथभुजलतावलेपवलनैः कृशाङ्ग्याः संतापं वदति बिसिनीपत्रशयनम् तथा ॥
चुम्बित्वा इसमहतं स्ववरं हि जइ सेहः महतः सिवसियपुणसंता इति पत्तणेणि पुनरुक्तं तथा
ऊविसाउपमस्णो डोउ वसम्मुह दोसो विहसम्मणो उजहगहि साउहहि अग्गहरेति उच्छिसमहि
लाउ ३९॥ तथा स्वजइ पहारेणवलः साइहि सो पियणि पणावदं मि उअविहसदंसि स्वजाते
हि स्वेपसवत्रीणि ३७॥

स्वयहणोवोणदेयतालक्ष्यते हरणेन तन्मत्रंत्रतापतिः ३९ कनिष्ठभार्यायाः स्तनहस्तेन वस्तनयाकांते नोचितस्मी
डायोगेन मृडकोपिप्रहारो दत्तः सपत्नीनां सौभाग्यसूचकः ईति कीउसं विभागमसमानो ऽव्ययेड सहोजातः मृडवा
देवान्यस्य दत्तो मृडः प्रहारोन्मे नवसंवेद्यते उः महत्त्वमृडरयोनिचित्रम् सानेनावफलवत्तं लक्ष्यते ३७॥

३५

कर्मव्यापारे

तथापरार्थैरिति

यद्यपि सत्त्वमूढाः करुणापेक्षया स्वनुभवति शान्तो मुख्य एव तथाप्यप्रसक्तत इद्दौर्मनस्यमाने पीडापात्रमनुभवनेनासद्भवता
पीडावत्त्वे लक्ष्यते तत्प्रपीड्यमानेपर्यवसानिः। ननु स्वस्यात्र श्रेयोजनेन किमिति न ध्वन्यते इत्याशंक्याह नचैवंविध इति ३८॥
उक्त्यन्तरेण ध्वन्यतिरिक्तेन स्फुटेन शास्त्रार्थव्यापारविशेषेणेत्यर्थः शान्त इति पञ्चसर्वेषु योज्यम् ध्वन्युक्तेर्विषयी भवेदिति।

तथापरार्थैर्यः पीडामनुभवति भंगेऽपि च मधुरो यदीयः सर्वेषामिह खलु विकारोऽप्यभिमतः न संप्रा
प्तो वृद्धिं यदि स भृशमक्षेत्रपतितः किमिक्षोर्दोषोऽसौ न पुनरगुणाया मरुभुवः॥ इत्यादौ इक्षुपक्षे
ऽनुभवतीत्याह नचैवंविधः कदाचिदपि ध्वनेर्विषयोऽभिमतः ३८ यतः उक्त्यन्तरेणाशक्यं यत्त
च्चारुत्वं प्रकाशयन् शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयी भवेत्॥ अत्र चोदाहृते विषये नोक्त्यन्तरे
णाशक्यचारुत्वव्यक्तिहेतुः शब्दः ३९॥

ध्वनिशब्देनोच्यत इत्यर्थः। उदाहृत इति वदतीत्यादौ॥ एवं यत्र प्रयोजनं सदपि नादरास्पदं तत्र को ध्वननव्यापार इत्यु
क्त्वा यत्र मूलत एव प्रयोजनं नास्ति भवति वोपचारः तत्रापि को ध्वननव्यापार इत्याह ३९॥

लावण्याद्याये शब्दाः स्वविषयाल्लवणरसयुक्तत्वादेः स्वार्थादन्यत्र रूपयत्वादौ रूढाः रूढत्वादेव त्रितयसन्निधापेक्षणं व्यवधानस्य
नाः यदाह ॥ निरूढा लक्षणाः काश्चित्सामर्थ्यादभिधानवत् इति तेनास्मिन्स्वविषयादन्यत्र प्रयुक्ता अपि न ध्वनेः पदं भवन्ति न
तत्र ध्वनिव्यवहारः उपचरितशब्दस्य हि निगीर्णतात्पर्यकीवेत्यर्थः प्रादक्षिण्येन आनुलोम्यं प्रातिकूल्यं सब्रह्मचारीत्येव
मादयः प्रावीण्यलावण्यादिकाः प्रसिद्धं ते लोम्नामनुगतमनुलोमं स्पन्दनम् कूलस्य प्रतिपन्नतया स्थिते स्रोतः प्रतिकूलं तस्य
गुरुः सब्रह्मचारी मुख्यो विषयः अन्यः पुनरुपचरितत्वेन च प्रयोजने किं विडहिष्ये लक्षणा प्रवृत्तेति न तद्विषयो
ध्वननव्यापारः ननु द्विरेफादिलक्षणादिरूपतत्त्वमिगमिद्धा लवणत्वं लेशचरिफोलपदरूपादौ लावण्यादिशब्दसन्निधौ

किंच ॥ रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः ॥ तेषु चोपच
रितशब्दवृत्तिरस्तीति तथाविधे च विषये क्वचित्संभवन्नपि ध्वनिव्यवहारः प्रकारान्तरेण प्रवर्तते न तथा

नेऽस्ति प्रतीयमानाभिव्यक्तिः मन्ये सा न न विधशब्दमुखेन ध्व० ॥ लावण्यशब्दान् अपि न समग्रवाक्यार्थप्रतीतौ तत्र ध्वन
नव्यापारादेव अत्र हि प्रियतमस्येव समस्ताशाप्रकाशकत्वं ध्वन्यते इत्यलं तदाह प्रकारान्तरेणेति व्यञ्जकत्वेनैव न तूपचरितलाव
ण्यादिशब्दप्रयोगादित्यर्थः एवं यत्र यत्र भक्तिस्तत्र ध्वनिरिति तावन्नास्ति तेन ध्वनेर्भक्तिर्लक्षणं न तावद्भक्तिसन्निधौ सर्वत्र ध्वनिव्यव
हारः स्यादिति न निर्व्याप्तिरभ्युपगमस्यापि क्रमः भवतु यत्र यत्र भक्तिस्तत्र तत्र ध्वनिः तथापि यद्विषयोऽपि लक्षणव्यापारेण न हि विषयो
ध्वननव्यापारः न च भिन्नविषययोर्धर्मधर्मिभावो धर्मरूपं च लक्षणमिति युज्यते तत्र लक्षणा तावदमुख्यार्थविषयो व्यापारः ध्वन
नं च प्रयोजनविषयं न च न हि विषयो भिन्नेऽपि लक्षणाव्यापारो लक्षणसामग्र्यभावात् इत्यभिप्रायेणाह ध्व० ॥ ३९

यदि

मुख्यार्थनिमित्तमभिधाव्यापारं परित्यज्य परिसमाप्य च लक्षणाव्यापारलक्षणं रूपयामर्थस्य मुख्यस्य तावद्दर्शनेनत्यायना साधयन्क लेक
मेभूतं प्रयोजनरूपमुद्दिश्य क्रियते तत्र प्रयोजनेनावहितो यो व्यापारः न वासौ लक्षणैव यतः स्खलनीबाधकव्यापारेण विधुरी।
क्रियमाणगतिर्बोधनशक्तिर्यस्य शब्दस्य तद्रूपो व्यापारो लक्षणा न च प्रयोजनमवगमयतः शब्दस्य बाधकयोगः त
याभावेन चापि निमित्तं तस्य प्रयोजनांतरस्य चान्वेषणे नावस्थानात् तेनायं लक्षणालक्षणायानविषय इति भावः ॥ दर्श
नमिति एवं तेनो निर्देशः कर्तव्यः प्रत्यवगमयितव्य इत्यर्थः ; अमुख्यतेति बाधके न विधुरीकृत तनेत्यर्थः ; तस्येति शब्दस्य तु हेते
वेति प्रयोजनावगमस्य स्खलत्संपन्नये हि स शब्दः प्रयुज्यते तस्मिन्नमुख्यार्थे यदि चासिंहो वटुरिति शौर्यादीति प्रायेपि प्रवगमयि
अपि च मुख्यार्थवृत्तिं परित्यज्य गुणवृत्त्यार्थदर्शनं यदुद्दिश्य फलेन तत्र शब्दो नैव स्खलद्गतिः ॥ न च हि
वारुत्वातिशयविशिष्टार्थप्रकाशन लक्षणे प्रयोजने कर्तव्ये यदि शब्दस्यामुख्यता तदा तस्य प्रयोगे दु
न व्ये स्खलद्गतित्वे शब्दस्य तत्रोद्दिश्य एतेनैव स्यात् न चैवं या ॥ नीतिनैव ज्ञापीदितिति किमर्थं तस्य प्रयोगः दुष्पवादेनैव कति
ष्यतीति वे तत्रापि प्रयोजनांतरमन्विष्यते तत्राप्युपवादेनैव स्यात् अथ तत्र न स्खलद्गतित्वे तर्हि प्रयोजनेवगमयितव्ये ^न^ लक्षणा ॥
णा व्यापारः तस्यामप्यभावात् न च तास्ति व्यापारो न चासावभिधा समयस्य तत्राभाववात् यद्व्यापारांतरमभिधा लक्षणाति
रिक्तं सधनतव्यापारः नचैवमिति तवप्रयोगे [illegible] दुष्टताकाविस्य प्रयोजनस्याविज्ञेने नेवप्रतीतेः तेनाभिधेयेव मुख्येयेवा
धकेन प्रविष्ट्वत्तु विरुध्यमाना सती अचरितार्थत्वात् प्रसरति अतएवामुख्यो स्याप्यमर्थ इति व्यवहारः तथैव चामुख्य
तया [illegible] संकेतग्रहणमपि तत्रास्तीत्यभिधापुच्छभूतैव लक्षणा तत्रोदितो वाचकत्वमभिधाव्यापारमाश्रिता तद्धायते

उपसंहरति तस्मादिति

ति=२

तथा=१ तस्मादिति=२

ध्वन्या- लो प्र- ३०

नचस्याद 37

नौनानत्वञ्चाभूतत्वाच्च गुणवृत्तिर्गौणलाक्षणिकशब्दवाच्य इत्यर्थः ॥ १८ ॥ ननु कथं ध्वनेर्व्यंजनात्मनो लक्षणा स्यादित्र विषयत्वादि-
त्येतदुपसंहरति ॥ १९ ॥ एतेऽव्याप्तिरुक्ता तन्न संगतं च भिन्नविषयत्वात्तस्मादित्येतादृश्यर्थः । एवमतिव्याप्तेरव्याप्तेर्वा सोऽलक्षते
तथेति कारिकागतामतिव्याप्तिं व्याख्याय अव्याप्तिमाविष्टं अव्याप्तिरस्येति अस्य गुणवृत्तित्वप्रसक्तस्य । यत्र यत्र ध्वनिस्तत्र तत्र भ-
क्तिर्भवेत् नास्य च व्याप्तिः न चैवमविवक्षितवाच्यस्य भक्तिः सुवर्णपुष्पामिति शिखरिणीत्यादौ तस्मात्कथम् ननु लक्षणाता
वज्जीणमपि व्याप्नोति केवलं शब्दस्य मुख्येऽलक्षयित्वा तेनैव सह समानाधिकरणं भजते सिंहो वटुरिति मुख्यो वाच्यान्तरं लक्ष्य-

डो तस्मात् ॥ वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता । व्यंजकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम् ॥ त-
स्मादन्यो ध्वनिरन्या च गुणवृत्तिः अव्याप्तिरस्य लक्षणस्य न हि ध्वनिप्रभेदो विवक्षितान्यपरवाच्यलक्षणः
अन्ये च बहवः प्रकारा भक्त्या व्याप्यन्ते ॥ तस्माद्भक्तिरलक्षणम् ॥ १२ ॥

यित्वा स्ववाचकेन तद्वाचकं समानाधिकरणं करोति शाब्दार्थौ वा युगपत्त्वे लक्षयित्वा ताभ्यामेव शब्दाभ्यां मिश्रीभवतीत्येव
लाक्षणिका ज्ञेया तस्य भेदः । यदाह गौणे शब्दप्रयोगे न लक्षणमिति तत्रापि न लक्षणास्येवेति सर्वत्रैव व्यापिका सा च एवं
विधा तद्यथा अभिधेयेन संयोगात् द्विरेफशब्दस्य योऽभिधेयो भ्रमरशब्दः द्वौ रेफौ यस्येति कृत्वा भ्रमरशब्देन यस्य संयोगः संबन्धः
षट्पदलक्षणस्यार्थस्य सोऽर्थो द्विरेफशब्देन लक्ष्यते अभिधेयसंबन्धं व्याख्यातम् रूपं निमित्तीकृत्य सामीप्यात् गंगायां घोषः ॥ ३०

समवायादितिसंबंधादित्यर्थः यष्टीः प्रवेशयेति यथा वैपरीत्याद्यथा शत्रुमुद्दिश्य कश्चिद्ब्रवीति किमिवोपकृतं तेन ते म-
मे इति क्रियायोगादिति कार्यकारणभावादित्यर्थः यथा अन्नापहारिणि व्यवहारे शालानयं हरतीति एवमनया लक्ष-
णया पंचविधयापि विश्वमेव व्याप्तम् तथाहि शिखरिणीत्यत्र कस्मिकश्चिद्विशेषादिबाधकानुप्रवेशोऽस्मादृशलक्षणस्यैव न
न्वङ्गीकृतैवमप्येलक्षणाकथं तत्स्वकं विवक्षितान्यपरेति ननु हेतोर्हि मुख्योऽसंलक्ष्यक्रमात्मा विवक्षितः तद्भेदशाद्धि नच
रसभावतदाभासतत्प्रशमभेदात्सदैवान्तरभेदाच्च न च तेषु लक्षणायाउपपत्तिः तथाहि विभावानुभावप्रतिपादके काव्ये त
त्रार्थे मुख्ये तावद्बाधकानुप्रवेशोऽप्यसंभाव्य इति को लक्षणावकाशः ननु किं बाधायदेव हि लक्षणायाः स्वरूपमभिधेयावि
नाभूतप्रतीतिर्लक्षणोच्यत इति इह चाभिधेयानां विभावानुभावादीनामविनाभूता रसादय इति लक्ष्यन्ते विभावानुभावयोः
कारणकार्यरूपत्वाद्व्यभिचारिणां च तत्सहकारित्वादिति चेन्मैव धूमशब्दाद्धूमे प्रतिपन्ने साग्निस्तिरोधिलक्षणाकृते व
स्यात् ततोऽग्नेः शीतापनोदस्त्वनितित्यादिरपर्यवसितः शब्दार्थः स्यात् धूमशब्दस्य स्वार्थे विश्रान्तत्वात् तावति व्यापार इ
ति चेत् अत्राप्युक्तं नहि मुख्यार्थबाधो लक्षणाया जीवितमिति सति हि तस्मिन् स्वार्थे विश्रान्त्यभावात् नच विभावादिप्रति-
पादने बाधकं किंचिदस्ति नन्वेवं धूमावगमनानन्तरमग्निस्मरणवद्धि भावादिप्रतिपत्त्यनन्तरं रसादिचित्तवृत्तिप्रतिपत्ति
रिति शब्दव्यापारएवात्र नास्ति इदं तावद्वयं पृच्छन्तीति स्वरूपज्ञो मीमांसकः प्रष्टव्यः किमत्र परचित्तवृत्तिमात्रे प्रतिपत्तिरेव र
सप्रतिपत्तिरभिमता भवतः नचैवं भ्रमितव्यम् एवं हि लौकिकगतचित्तवृत्त्यनुमानमात्रमिति का रसता यस्त्वलौकिक
चमत्कारात्मा रसास्वादः काव्यगतविभावादिचर्वणानुमानादिना स्वलीकारयात्रीकर्तव्यः किंतु लौकिकेन कार्यं ॥

प्रारणो नाताव =१

ध्वन्या· लोच· ३८ 38

दिना=१ रत्तो=३

निपद्यते

कारणानुमानात्संस्कृतहृदयो विभावादिकं प्रतिपद्यमान एव न ताटस्थ्येन प्रतीयते अपि तु हृदयसंवादापरपर्यायसहृदयत्वपरव
शीकृततया पूर्णीभविष्यद्रसास्वादाङ्कुरीभावेनानुमानस्मरणादिसरणिमनारुह्यैव तन्मयीभवनोचितचर्वणाप्राणतया न तु
सैव चर्वणा प्रमाणान्तरैर्जाता पूर्वं येनेदानीं स्मृतिः स्यात् न चाधुना केनचित्प्रमाणेन तदुत्पन्ना अलौकिके प्रत्यक्षाद्यव्यापारात्
अत एवालौकिक एव विभावादिव्यवहारः। यदाह विभावो ज्ञानार्थः लोके न कारणमेवाभिधीयते न विभावः। अनुभावो
प्यलौकिक एव। यदाह यदयमनुभावयति वागङ्गसत्त्वकृतोऽभिनयस्तस्मादनुभाव इति। तच्चित्तवृत्तितन्मयीभवनमेवमेव।
त्वनुभवनम् लोके न कार्यमेवोच्यते नानुभावः। अत एव परस्थो यानुविद्धचित्तवृत्तिर्गम्यते इत्यभिप्रायेण विभावानुभावव्यभिचारिसं
योगाद्रसनिष्पत्तिरित्युक्तं स्थायिग्रहणं न कृतं तत्प्रत्युत शल्यभूतं स्यात् स्थायिनस्तु रसीभाव औचित्यादुच्यते तद्धि भावानु
भावोचितचित्तवृत्तिसंस्कारसुन्दरचर्वणोदयात् हृदयसंवादोपयोगिलोकचित्तवृत्तिपरिज्ञानावस्थायां उद्यानपुलकादिभिः
स्थायिभूतरत्याद्यवगमाच्च व्यभिचारी तु चित्तवृत्त्यात्मत्वेऽपि मुख्यचित्तवृत्तिपरवश एव चर्व्यत इति विभावानुभावमध्यगणितः॥
अत एव रसमानतायां एषैव निष्पत्तिः। या प्रबन्धप्रहृत्तबन्धुसमागमादिकारणादिना हर्षादिलौकिकचित्तवृत्तिन्यग्भावेन
चर्वणारूपत्वम्। अतश्चर्वणात्राभिव्यञ्जनमेव न तु ज्ञापनं प्रमाणव्यापारवत् नाप्युत्पादनं हेतुव्यापारवत्। ननु यदि नेयं
ज्ञप्तिर्नवा निष्पत्तिः तर्हि किमेतत् ननु एष स एवालौकिको रसः। अपि तु चर्वणोपयोगीन नन्वत्युक्तं तु हृदयस्य अन्यच्च एतत एव न दृष्टं
न तत एवालौकिकमित्युक्तम्। ननु एवं रसोऽप्रमाणं स्यात् अस्तु किं ततः। तच्चर्वणात एव प्रीतिव्युत्पत्तिसिद्धेः। किमन्यदर्थनी
यम्। नन्वप्रमाणकमेतत् न संवेदनसिद्धत्वात् ज्ञानविशेषस्यैव चर्वणात्मत्वादित्यलं बहुना। अत्र चायं रसो यमलौकिकः येन

यं पि

लालितप्रकृत्याद्यनुशासनस्यार्थाभिधानानुपयोगिनोऽपि स्वसंप्रतिपत्त्यंजकत्वं च कानन्वलनन्तरणायाः पंकापिका व्यात्मकशब्दनिषी
द्धेनैनैव वचनस्वर्धुणा हृष्यतेत हृष्यते हितदेवकार्ये पुनः पुनः पादस्वर्वयमानस्वस्तस्य लोकः न तत्काव्यस्य तत्प्रयोजनत्वाद्वि
घहेयाद्दतिन्यायेन कृतप्रतीतिकस्यानुपयोगापवेतिशब्दस्यापि धनतव्यापारः अनपवालत्वक्रमतापन्नवाक्यभेदः स्यादि
व विधीयते सन्ध्यादिमयस्य प्रबंधशरीरस्य यथा कार्यमेकमनुयायि व्यापकं कल्प्यते तन्मकार्यान्तरैर्नैस
कीर्यते न च तैः संकीर्यमाणमस्यापितस्य प्राधान्यमपचीयते तथैव रसस्याप्येकस्य सन्निवेशे क्रियमा
णे विरोधो न कश्चित् प्रत्युत प्रत्युदितविवेकानामनुसन्धानवतां सचेतसां तथाविधे विषये प्रह्ला
दातिशयः प्रवर्तते ५८॥

बिंदुरिति बिंदुरूपप्रायोऽर्थप्रकृत्या निर्व्यूढत्वपर्यंतं व्याप्नोति तदाह अनुयायीतिप्रत्येतेन
बीजं बिंदुश्चेत्यर्थः प्रकृतैः संगृहीते कार्यान्तरैरिति प्रागभावादविमर्शान्तापताकावितिनिवर्तितं इति प्रासंगिकेऽप
ताकालक्षणेऽर्थप्रकृतिनिष्ठे कार्ये यानि च तत्तानव्याप्तिनयाप्रक रीलक्षणानि कार्याणि तैरित्येवं पताकाम
र्थप्रकृतीनां वाक्यैकवाक्यतया निवेशः उक्तः तथाविषयइति यथा तापसवत्सराजे एवमनेन श्लोकेनांगांगिभावस्य

तिदर्थं निर्व्यूढं पितं हत्रिग स्थोस्म भयाभिप्रायेणैव ः ५८

शृंगारेण वीरस्याविरोधः युद्धनयपराक्रमादिना कन्यारत्नलाभादौ हास्यस्य तु स्पष्टमेव तदंगत्वम् हास्यस्य अद्भुत-
स्यार्थस्वभावत्वेऽपि समधिकरंजनोन्मादनेन शृंगारांगतयैव तथात्वात् रौद्रस्यापि तेन कथंचिद् विरोधः यथोक्तं शृंगारश्च
तैः प्रसभं सेव्यते इति तैरिति रौद्रप्रभृतिभी रक्षोदानवोद्धतमनुष्यैरित्यर्थः केवलं नायिकाविषयमौग्र्यं तत्र परिहर्तव्यम् प्रसंभाव्यप्र-
स्थिवीर्जनादिजनितविस्मयतया तु वीराद्भुतयोः समावेशः क्रोधोत्साहयोरविरोधात् रौद्रकरुणयोश्च नितिनेवाङ्गः रौद्रस्यैव
वयत्वर्मसञ्ज्ञेयः करुणो रस इति शृंगाराद्भुतयोरपि यथा रत्नावल्यामैन्द्रजालिकदर्शने शृंगारवीभत्सयोरिति यथोर्हि परस्परो

ननु येषां रसानां परस्पराविरोधो यथा वीरशृंगारयोः शृंगारहास्ययोः रौद्रशृंगारयोः वीराद्भुतयोः वीररौद्रयोः शृं-
गाराद्भुतयोर्वा तत्र भवत्वंगांगिभावः तेषां तत्कथं भवेत् येषां परस्परं बाध्यबाधकभाव एव यथा शृंगारबी-
भत्सयोः वीरभयानकयोः शान्तरौद्रयोः शान्तशृंगारयोर्वा इत्याशंक्येदमुच्यते अविरोधी विरोधी वा रसोऽङ्गिनि
रसान्तरे परिपोषं न नेतव्यस्तथा स्यादविरोधिता अङ्गिनि रसान्तरे शृंगारादौ प्रबन्धव्यङ्ग्ये सत्यविरोधी विरोधी
वा रसः परिपोषं न नेतव्यः ४९ ॥

न्मूलनात्मकतयैवोद्भवस्तत्र कोऽङ्गाङ्गिभा- वः आलंबननिमग्नत्वतया चाङ्गत्वमिति स-
मानाश्रयत्वेन तयोरन्योन्यससमूलोन्मूलकत्वं भयोत्साहावेव्येवमेव विकल्पो वाच्यो शान्तस्यापि तत्त्वज्ञानसमुत्थितसमस्त-
संसारविषयनिर्वेदप्राणत्वेन सर्वतो निरीहस्वभावस्य विषयासक्तिजीवितनाभ्यां रतिक्रोधाभ्यां विरोध एव अविरोधीति विरो-
धीति वा यदुक्तमस्यायमभिप्रायः अङ्गिरसापेक्षया यो यस्य रसान्तरस्योत्कर्षो निबध्यते तदा विरुद्धो रसो निबद्धव्यो वा बहुः अ-
यत्नु प्रबन्धाङ्गिनि रसेऽङ्गभावतया नो परिनिर्वहते न हि कश्चिदपि रसो वक्ष्यमाणानां विषयभेदादियोजनेनापनिबध्यमानो न दोषा-

वदइति विरोधाविरोधावकिंवितर्कैर्विनिवेपानेनप्रकारएवंसर्वथातव्यमिति अंगिनोतिसम्यक्त्वादेवांगिनेरसविरो
धवतादृष्टत्यक्कृतांगभूतानपोषयितव्यइत्यर्थः अविरोधितेतिनिर्दोषतेत्यर्थः ५८ परिपोषपरिहारेत्रीन्प्रकारान्ना
ह ननुन्यूनत्वंकर्तव्यमितिवाच्ये आधिक्यस्यकासंभावनायेनोत्कर्षाधिक्यंनकर्तव्यमित्याशंक्याह उत्कर्षसाम्यइति एक
तोरोदितिप्रियाअन्यतःसमरतूर्यनिर्घोषःस्नेहेनरणरसेनचभटस्यदोलायितंहृदयमितिरोदितिप्रियेत्युतोरत्युत्कर्ष
समरतूर्यतिभटस्येतिचोत्साहोत्कर्षदोलायितमितितयोरन्यूनाधिकतयासाम्यमुक्तम् एनमप्युक्तंकविविषयमेवभवति न

तत्राविरोधिनोरसस्यांगिरसापेक्षयात्येनमाधिक्यंनकर्तव्यमित्ययंप्रथमःपरिपोषपरिहारः उत्कर्षसाम्येपि
तयोरविरोधसंभवात् यथा एक्कत्तोरुअइपिआअण्णत्तोसमरतूरणिग्घोसोणेहेणरणरसेणभडस्सदो
लाइअंहिअअम् यथावा कंठाश्लिष्टान्तमालावलयमित्यादिश्लोके ५९॥

तत्रचविषयमितिकेचिदाहुः तदसत् आधिकारिकेपीतिवृत्तेत्रिवर्गफलेसमप्राधान्यस्य संभवात् तथाहिरत्ना
वल्यांसचिवायत्तसिद्धत्वाभिप्रायेणपृथ्वीराज्यलाभआधिकारिकेफलम् कन्यालाभःप्रासंगिकंफलम् नायिका
भिप्रायेणतुविपर्ययइतिस्थितेमंत्रिबुद्धौनायकबुद्धौचसाम्यमात्रबुद्धेःकत्वात्फलमिति नीत्यैकौचित्यमाश्रित्यां
समप्राधान्यंपर्यवस्यति यथोक्तम् कवेःप्रयत्नान्नेतॄणांयुक्तानामित्यत्रसमवोनवेदबहुता ५७॥

एवं प्रथमं प्रकारं निरूप्य द्वितीयमाह अंगभूतेऽप्यस्य इति शेषः नन्वेवं नासौ परिनिष्ठितो भवेदित्याशंक्य मूलोत्तरमाह निवेशनेवेति
अनुपपत्त्या शब्देन गुणत्वं तदाचष्टे सूचयति न विकल्पम् तथा च एक एवायं प्रकारोऽन्यथा तद्द्वौ स्याताम् अंगिनो रसस्य यो
व्यभिचारी तस्यानुगतत्वेनानुसन्धानम् यथा कोपात्कोमललोलेति श्लोके गिभूताया रसभावोपात्तेनयः अप्यत्रोपनिबद्धः।
तत्र बद्धादृढमिति समर्थस्य निवेशितस्यापि प्रमेव रूढत्वेऽतिदृढमनुत्रितिनिवहस्यापि तेष्यीन्यत्रकार्यदर्शनेनानुसन्धानम् ४८ तृतीयं

अंगिरसविरुद्धानां व्यभिचारिणां प्राचुर्येणानिवेशनम् निवेशनेवाचिरमेवांगिगतव्यभिचार्ये।
नेच्छन्निति द्वितीयः ४८ अंगत्वेन पुनः पुनः प्रतिबद्धापरिपोषणीयमानस्याप्यंगभूतस्य रसस्यैवे
ति तृतीयः ४९ अनयादिशान्येऽपि प्रकारा उत्प्रेक्षणीयाः ५० ॥

प्रकारमाह प्रबन्धनायकस्य वत्सराजे वत्सराजस्य पद्मावतीविषयसंभोगश्रृंगारोऽद्राद्दर्शनीकर्तव्यः ४९ अन्येऽपीति विभावा
नुभावानां चाधिक उत्कर्षेण कर्तव्यो गिरसविरोधनान्तर्निमेषणमेव वा न कार्यम् कृतमपि वांगिरसविभावानुभावैरु
पबृंहणीयं परिपोषिता प्रियवाविरुद्धरसविभावानुभावाश्चेन्न अंगत्वेन प्रतिजागरितव्या इत्यादि स्वयं शक्यमुत्प्रेक्षितुम् ५०

एवं विरोध्यविरोधिसाधारणं प्रकारमभिधाय विरोधिविषयसाधारणदोषपरिहारप्रकारं गतमेवैतद्विशेषान्तरमप्याह सं
भवतीति यथा नाविरोधिनो नेति विरोधः प्रतिष्ठित उपकार्योपकारकभावो रसानां नास्ति स्वचमत्कारविश्रान्तत्वात् अन्यथा रसता
योगान्तरभावे वा कथमङ्गाङ्गितेत्यपि येषां मतं तेषामपि कस्यचिद्रसस्य प्रकृष्टत्वे भूयः प्रबन्धव्यापकत्वम् अन्येषां वा स्वप्रबन्ध
गामित्वमभ्युपगन्तव्यम् इति सूत्रसंवृद्धनायोपन्यासयोरनुपपत्तेः भूयः प्रबन्धव्यापकस्य च रसस्य रसान्तरैर्यदि न काचित्
संगतिस्तर्हि तत्रस्यापि न स्यात् संगतिश्चेदियमेवोपकार्योपकारकभावेन चमत्कारविश्रान्तेर्विरोधः कश्चिदिति समन्व

विरोधिनस्तु रसस्याङ्गिरसापेक्षया कस्यचिन्न तु सम्पादनीया। यथा शान्तेऽङ्गिनि शृङ्गारस्य शृङ्गारे वा।
शान्तस्य परिपोषरहितस्य रसस्य कथं रसत्वमिति चेत् उक्तमङ्गिरसापेक्षयेति अङ्गिनो हि रसस्य
यावान् परिपोषः तावांस्तस्य न कर्तव्यः स्वतस्तु सम्भवी परिपोषः केन वार्यते एतच्चापेक्षिते हि प्रकर्ष
योगित्वेन कस्यचिद्रसस्य बहुरसेषु प्रबन्धेषु रसानामङ्गाङ्गिभावमनभ्युपगच्छताप्यशक्यप्रतिक्षेपमित्य
नेन प्रकारेणाविरोधिनां विरोधिनां च रसानामङ्गाङ्गिभावेन समावेशे प्रबन्धेषु स्यादविरोधिता ५०॥

तरमेवोक्तम् तदाह अनभ्युपगच्छतेति शब्दमात्रेणासौ नाभ्युपगच्छति अकामस्त्ववाभ्युपगमयितव्य इति भाव
अभ्युपगत्याच्चैतत् एतच्चापेक्षिते हि कमित्यादिग्रन्थेन द्वितीयमतमभिप्रेत्य यत्र रसानामुपकार्योपकारकता नास्ति तत्रापि
हि भूयो ग्रन्थव्यापृतत्वमेवाङ्गित्वमिति एतच्चासत् यतो हि एतच्च सर्वमिति सर्वशब्देन यदुपसंहारः एकः पक्षाविवयोर्मतं
तेषां त्यादिनावयाहितीयपक्षोपक्रमः सोऽतीवः क्लिष्ट इत्यलं पूर्वैः सह बहुना संलापेन ५०॥

उपसंहरति येषामिति भावा यस्मिन्नामावसन्ति श्लोकः बहूनां समवेतानां रूपं यस्य भवेद्बहु समन्तव्यो रसः स्थायी शेषाः
संचारिणो मताइति तत्रोक्तक्रमेणाधिकारिकेति नु स्थायिकावि भवत्वित्रिवर्गमेव स्थायित्वेन भाति शासे रौकहृतोत
गामिनी तत्र्यभिचारितयेति रसस्यैव समानतायामपि स्थायि संचारिता लीलाचित्त्रिप्याभ्युपगमे नैवोच्चरमेवोचनतद्धा।
दमस्तीति अन्ये तु स्थायितया पतितस्थायि स्थायित्वमेव रसानां तेषां यथा नत्वेतानुविभावकस्य निर्वेदस्य शान्तत्यभिचारे
णो वासनयवच्छ्रमिचार्येन वापेक्षया स्थायित्वमेव यथाविक्रमादेश्णामूतायवतर्थेकेऽतो येन मर्थमर्थमवबोधयितमये

एतच्च सर्वं येषां रसो ऽरसोऽतावस्य व्यभिचारीभवतीति दर्शितं तन्मतेनोच्यते ५१ मतान्तरेऽपि स्थायिभावा
रसानामुपचाराद्रसशब्देनोक्ताः तेषामङ्गत्वं निर्विरोधित्वमेव ५२ ॥

श्लोको बहूनां चित्तवृत्तिरूपाणां भावानां मध्ये यस्य बहुलं रूपं यथोपलभ्यते स स्थायी भावः स च रसो रसीकरणयोग्यः शे
षास्तु संचारिण इति यावदनेन तु रसानां स्थायि संचारि स्थायेनाङ्गाङ्गिनापुक्तमिति अत एवान्येरसस्थायीति बध्यासम
स्याहितीयायावाश्रितादिषु गम्यादीनामिति समासपदमिति ५१ तदाह रसान्तराणि विशेषेण व्यथः ५२ ॥

अथ प्रसाधारणं प्रकारान्तरमुपसंहरन्नयमाह विरुद्धेति विशेषणं द्वे न तावन्मे यस्तु स्थायी स्यात्तेनैव सम्भाव्यमानैकाश्रय।
त्वाद्विरोधी भवेद्येनास्माद्धेन भयस्य भिन्नाश्रयत्वेन नायकगतहि पक्षादिगामित्वेन कार्यस्तस्येति तस्येति तस्य विरोधिनोऽपि त
था स्क्रतस्य न यानि बद्धस्य परिपुष्टनायकस्य तन्निर्देशान्नायकोत्कर्षदानात् अपरिपोषणं न दोष एवेति यावत् अविशाद्धे।

एवमविरोधिनां विरोधिनां च प्रबन्धस्थेनाङ्गिना रसेन समावेशे साधारणमविरोधोपायं प्रतिपाद्येदानीं विरोधिवि
षयमेव तं प्रतिपादयितुमुच्यते विरुद्धैकाश्रयो यस्तु विरोधी स्थायिनो भवेत् स विभिन्नाश्रयः कार्यस्त
स्य पोषेऽप्यदोषता एकाधिकरणविरोधी नैरन्तर्यविरोधी चेति द्विविधो विरोधी तत्र प्रबन्धस्थेन स्था
यिनाङ्गिना रसेनौचित्यापेक्षया विरुद्धैकाश्रयो यो विरोधी यथा भयेन भयानकः स भिन्नाश्रयः का
र्यः तस्य वीरस्य य आश्रयः कथानायकः तद्विपक्षविषये संनिवेशयितव्यः तथा सति च तस्य विरो
धिनो यः पोषः स निर्दोषः विपक्षविषये भयातिशयवर्णने नायकस्य नयपराक्रमादिसंपत्सुतरामुद्योति
ता भवति एतच्च मदीयेऽर्जुनचरितेऽर्जुनस्य पातालावतरणप्रसङ्गे वैशद्येन प्रदर्शितम् ५३॥

भिन्नक्रमः एवमेव व्याख्यातुमपि व्याख्यातं एकाधिकरणमेकाश्रयेण सम्बन्धमात्रं तेन विरोधी यथा भयेनोत्साहः एकाश्रय
त्वेऽपि संभवति कश्चिन्नैरन्तर्ये तु निर्बाधं यथा न त्वेन विरोधी यथा रत्यादिः प्रदर्शितमिति सम्बन्धिनेयर्थो नो भयाव
हे किरीटिनः महानुपप्लवो भवत्सुरेषु वन्दरहितयामित्यादिना ५३॥

ध्व॰ लोच॰ ११९

119

द्वितीयस्येति नैरन्तर्येविरोधिनः तदिति निर्विरोधित्वं प्रकाश्यत्वेन निमित्तेन यो निर्दोषो न विरोधी किं तु निरन्तरत्वेन
निमित्तेन विरोध्यमेवेति सततयाविधविरुद्धरसद्वयाविरुद्धेन रसान्तरेण मध्ये निवेशितेन पुष्टः कार्य इति कारिकार्थः प्रब
न्ध इति बाहुल्यापेक्षम् मुक्तकेऽपि कदाचिदेवं भवेदपि यदुच्यते प्रकवाक्यस्य यारपीति यद्येतत्र हि नागस्यास्य रमिस्त्वे
मि न हि मे ध्वंसीति न प्रत्यय इत्यादि नाप्येतेषाम्प्रभृति पर्यायशरीरवितरणात्मक निर्वाहणपर्यन्तः शान्तरसस्य स्थायी विरुद्धो
मलयवतीविषयः शृङ्गारस्तु भयाविरुद्धमद्भुतमेव नरोत्तम क्रमप्रसरसे भावनाभियोगपालक कविना निबद्धः प्रह्लोभिन

एवमेकाधिकरणविरोधिनः प्रबन्धस्थायिनः रसस्याङ्गभावगमने निर्विरोधित्वं यथा प्रदर्शितं द्वितीयस्य
तत्र निर्दोषत्वमुच्यते एकाश्रयत्वे निर्दोषो नैरन्तर्ये विरोधवान् रसान्तरव्यवधिना रसो व्यङ्ग्यः सुमेधसा ॥
नैकाधिकरणत्वेन निर्विरोधो नैरन्तर्ये तु विरोधी रसान्तरव्यवधानेन प्रबन्धे निवेशयितव्यः यथा शान्तशृङ्गारौ
नागानन्दे निवेशितौ ॥ ५७ ॥

महोत्साहादित्रमिति एतदर्थमेव व्यक्तिव्यञ्जन
शान्तनेत्यादिनी रसशायमध्ये निबद्धं सत्
नामद्भुतरसपरिपोषकतया सन्तरसस्तावदमिति निर्दोषदर्शिना कन्यकाइति च क्रमप्रसरेण निबद्धः यथाद्भुतश्रित्वेति
सरभसं व्यानाधाना सोत्साः पुरुषार्थदेतकमिदं निमित्तनैमित्तिकप्रसङ्गेनेति अनन्तरं च निमित्तनैमित्तिकप्रसङ्गागतोय
शोत्व कल्पितेरिन हास्यरसोपकृतः शृङ्गारस्तस्य विरुद्धो यो वैराग्यशमपोषको नागोत्पकलेवरादिगुणानां लोकनादिकृतात
समित्रावसाः प्रविष्टस्य मलयवती निर्गमनकामिनः सेसर्पदष्टः समन्ताद्दिव्यादिका व्याधपने निबद्धः क्रोधव्याभिचारि परकृत

ननु नास्त्येव शान्तो रसः तस्य हि स्थाय्येव नोपदिष्टो मुनिनेत्याशङ्क्याह तृष्णानां विषयाभिलाषाणां यः क्षयः सर्व
तो निवृत्तिरूपो निरोधस्तदेव सुखम् तस्य यः स्थायीभूतस्य यः परिपोषो रस्यमानताकृतः स्वानुभावेनापि निवृत्तभा
जनाद्यशेषविषयेच्छाप्रसरत्वकाले सम्भाव्यत एव अन्ये तु सर्वचित्तवृत्तिप्रशम एवास्य स्थायीति मन्यन्ते तच्चासद्भा
वस्य प्रसज्यप्रतिषेधरूपत्वे चेतोवृत्तिभावेन भावत्वायोगात् पर्युदासे च शम सुखमेव वा यम् अन्ये तु स्वेच्छति मित्रमुसा
धर्मोत्साहत्यघृते रसः उत्तरैर्निर्विशेषत्वात् तेषां तत एव प्रतीयत इति भरतनाम्ना दृष्टत्वात् सर्वरससमानस्य स्वभावगणत
मावत्तत् अन्तर्गतविशेषो नेति चित्तवृत्तिरूपं ह्येतत् स्थायिभावं मन्यन्ते एतच्च नातीतानां मन्यन्ताह्युत्सर्गभावप्र
पंसाभावकृतत्वविशेषः पुरुषार्थमेव तृष्णानां यथा क्रमवीतरागजन्मादर्शनादिति प्रतीयत एवेति मुनिना

शान्तश्च तृष्णाक्षयसुखस्य यः परितोषः तल्लक्षणो रसः प्रतीयत एव ५५॥

पोगीन्द्रियेन एवं कश्चित् मह त्यादिवदनानन्दीया पर्यन्तं वस्याव्यावर्णनीया येन सर्वं दृष्टोपरमात् तन्मात्राभावेना
प्रतीयमानता स्यात् शृङ्गारादेरपि हि फलभूमावव्यावर्णनीयतैव सर्वं भूमौ न प्रयोगो नवा हि नासंस्कारो न हि दृष्टप्रत
याऽन्तराणि संस्कारैस्यादिति सूत्रद्धयन्तीत्यावित्र कारणमनियमादिवेष्टाव्यारम्भोहृदनादिलक्षणावाप्तान्तस्यापित
न कार्येई ष्टेन्द्रेणानुभवसञ्ज्ञावायमादि मध्यसञ्ज्ञायमानभूया व्यभिचारिसञ्ज्ञावाश्च प्रतीयन्ते न एवं वेनैनप्रतीयते
नास्य विभावाः सन्तीति चेत् प्रतीयत एव तावद्सौ तस्य च भवितव्यमेव प्राक्तनकुशलपरिपाक परमेश्वरानुग्रहा
ध्यात्मरहस्यशास्त्रवीतरागपरिशीलनादिभिर्विभावैरिति निरूप्यते व्यभिचारिसञ्ज्ञावः स्थायीदर्शितः ५५॥

ध्व
लो तृ
७२

ननु तत्र एकदेशसंवादाभावाद्दृश्यमानैर्वर्णनोपपन्ना कथमित्याह सन्ता सीति यतः प्रतीयमानप्रतिभेदं अन्यत्प्रतीयते सर्वस्य तत्
स्ताव्यास्वादनं भवति न हि वीतरागाणां शृंगारे नस्वादत्र इति सोपि रमतां शृण्वतामिति तदाह नत्वधर्मप्रधानोऽसौ वीर एवेति।
संभावयमानस्त्वाह ५८ तस्येति वीरस्याभिमानमयत्वेनेति उत्साहस्य हृदयमेवं विधरत्येव शान्त इत्यर्थः अस्यैवेति शान्तस्य

यदि नाम सर्वजनभावगोचरता तस्य नास्ति तेनावनामसावलोकसामान्यमहाजनभावविद्धत्वेन विशेष
वत्स्वनिर्दिष्टेषु श्वकः ५८ ननु धर्मप्रधानोऽसौ वीर एवेति संभावयमानस्त्वाह वीरस्य न स्योनभावः क
तेमयुक्तः तस्याभिमानमयत्वेन व्यवस्थानात् तस्माद्देकोऽस्मिन् एकरूपतया स्थितेः तयोरप्येवं विध।
विषयसञ्ज्ञेव यद्येको परिकल्प्यते तदा वीररौद्रयोरपि तथा प्रसंगः ५०॥

तयोश्चेति उत्साहमयत्व निर्विद्धत्वेनात्येन विरुद्धयोरपीति चशब्दार्थः वीररौद्रयोस्तत्त्वेन विरोधो नास्ति समानेऽप्येवं
धर्मोपयोगित्वम् ननु त्वेवं दयावीरो नभिधीयतां धर्मवीरो दानवीरो वा नासौ कश्चित् एवं नत्वेवं नामान्तरकरणं
तदाह मुनिः दानवीरं धर्मवीरं युद्धवीरं तथैव च रसवीरमपि प्राह ५०॥

१०

त्रिविधस्येति मागमपुरःसरं त्रैविध्यमेवास्य यथात् तदेवाह आदिग्रहणेन विषयजुगुप्सारूपत्वाद्बीभत्सेऽन्तर्भावः शान्ते तु सात्त्व
व्यभिचारिणी भवति न तु स्थायितामेति पर्यन्तनिर्वाहे तस्या मूलतयैव विच्छेदात् आधिकारिकत्वेन शान्तो रसोऽति
बहुरिति वैचित्रिकाकारः तेषु हास्यादिभिव्यपर्यासोऽवितेषु गौणतान्यो मोक्षफलत्वेन चायं परपुरुषार्थनिष्ठितत्वात्सर्वरसेभ्यः

दयावीरादीनां चित्तवृत्तिविशेषाणां सर्वाकारमहंकाररहितत्वेन शान्तरसप्रभेदत्वमितरथा तु वी-
रप्रभेदत्वमिति न कश्चिद्विरोधः तदेवमस्ति शान्तो रसः तस्य चाविरुद्धरसव्यवधानेन प्रबन्धे विरोधि-
रससमावेशे सत्यपि निर्विरोधित्वं यथाप्रदर्शिते विषये ५८॥

प्रधानतमः स चायमस्मदुपाध्यायभट्टतौतेन काव्यकौतुके अस्माभिश्च तद्विवरणे बहुकृतनिर्णयपूर्वपक्ष-
सिद्धान्त इत्यलं बहुना ५८॥

स्थिरीकर्तुमिति विरोधाभावबुद्धाविन्यर्थः । अपिशब्देन प्रबन्धे पश्च यत्तत्सिद्धो यमर्थ इति दर्शयति भूरेणुदिग्धानिति विशेषणगणेनैव तीवृद्धरा-
पेतत्वमसंभावनानिवृत्त्यै रेकाश्रयत्वमस्ति मन्यथा विभिन्नविषयत्वान्को विरोधः । नववीररसावान्तरसेन शृङ्गारो न बीभ-
त्सः किं तु वीरजुगुप्से हि वीरं प्रति व्यभिचारीभूते भवत एवं तथाप्युक्तेनोदाहरणेनातावडपयच्चान्तदाह तदङ्गयोर्वेति तयो-

तदेव स्थिरीकर्तुमिदमुच्यते रसान्तरान्तरितयोरेकवाक्यस्थयोरपि निवर्तते हि रसयोः समावेशे वि-
रोधिता रसान्तरव्यवहितयोरेकप्रबन्धस्थयोर्विरुद्धयोर्विरोधिता निवर्तत इत्यत्र न काचिद्भ्रान्तिः
यस्मादेकवाक्यस्थयोरपि रसयोरुक्तया नीत्या विरुद्धता निवर्तते यथा भूरेणुदिग्धान्नवपारिजातमा-
लारजोवासितबाहुमध्याः गाढं शिवाभिः परिरभ्यमाणान्सुराङ्गनाश्लिष्टभुजान्तरालाः सशोणितैः
क्रव्यभुजां स्फुरद्भिः पक्षैः खगानामुपवीज्यमानान् संवीजिताश्चन्दनवारिसेकैः सुगन्धिभिः कल्प-
लतादुकूलैः विमानपर्यङ्कतले निषण्णाः कुतूहलाविष्टतया तदानीं निर्दिश्यमानांल्ललनाङ्गुलीभि-
र्वीराः स्वदेहान्पतितानपश्यन् इत्यादौ अत्र हि शृङ्गारबीभत्सयोस्तदङ्गयोर्वा वीररसव्यवधाने-
न समावेशो न विरोधी ५९॥

वेगे तत्र स्थायिभावावित्यर्थः । वीरो रस इति वीराः स्वदेहानित्यादिना तदीयोत्साहस्य चर्व्यमानत्वात्कर्तृकर्मणोः समस्तवाक्या-
र्थीभूतपायितया प्रतीतिविश्रान्तिमध्यपाताभावेऽपि तत्र तयोर्वीररसव्यवधायकत्वमिति भावः ५९॥

एवं चेति यतोसौ सर्वसंचारीत्यर्थः तदिति शृंगारस्य विरुद्धा ये शान्तादयस्तेष्वपि तु तदंगानां शृंगाराङ्गानां संबन्धी स्प-
र्शो नदुष्टः तथा भयानकरसेतरंगता अपि विभावानुभावाद्या वर्णनीयाः यथोः शृंगाराङ्गभावमनुपागमत् यथा ममैव
स्तोत्रे त्वां चंद्रचूडं सहसा स्पृशन्ती प्राणेश्वरं गाढवियोगतप्ता सा चन्द्रकान्ताकृतिपुत्रिकेव संविद्विलीयापि विलीय-
ते मे इत्यत्र स्पृशन्ती विभावानुभावानामपि शृंगाराङ्गभावनिरूपणं विनेयानुन्मुखीकर्तुं या काव्यशोभा तदर्थं तेनैव दुष्यती-

विरोधमविरोधं च सर्वत्रेत्थं निरूपयेत् विशेषतस्तु शृंगारे सुकुमारतमो ह्यसौ यथोक्तलक्षणानुसारे-
णाविरोधाविरोधौ सर्वेषु रसेषु प्रबन्धेनान्यत्र च निरूपयेत्सहृदयः विशेषतस्तु शृंगारे स हि रतिपरिपोषात्म-
कत्वाद्रतेश्च स्वल्पेनापि निमित्तेन भंगसंभवात्सुकुमारतमः सर्वेभ्यो रसेभ्यः मनागपि विरोधिसमावेशं
न सहते अवधानातिशयवान् रसे तत्रैव सत्कविः भवेत्तस्मिन्प्रमादो हि झगित्येवोपलक्ष्यते तत्रैव च र-
से सर्वेभ्योपि रसेभ्यः सौकुमार्यातिशययोगिनि कविरवधानवान्प्रयत्नवान्स्यात् तत्र हि प्रमाद्यतस्तस्य स-
हृदयमध्ये क्षिप्रमेवावज्ञानविषयता भवति शृंगाररसो हि सर्वसंसारिणां नियमेनानुभवविषयत्वात्सर्व-
रसेभ्यः कमनीयतया प्रधानभूतः ८०॥

तिसंबन्धः वाग्रहणेन पक्षान्तरमुच्यते तदेतद्व्याचष्टे न केवलमिति वा-
शब्दस्यैतद्व्याख्यानम् अविरोधलक्षणं परिपोषपरिहारादि पूर्वोक्तं तदर्थमपि वा अविरुद्धसमावेशो न केवलं पूर्वोक्तैः प्र-
कारैः तत्काव्यशोभाविनेयोन्मुखीकरणं तदेतदेव व्यवधानाव्यवधाने अपि केन विहन्यते तथा हि व्याख्यानेष्वेव भि-

ध्वं॰ [illegible] ८०॥

ननु काव्यं क्रीडारूपं क्वावेदादिगोचरमुपदेशकथा इत्याशंक्याह मुनिभिरिति भरतादिभिः एतस्य प्रभवस्तस्मात्तेभ्यः शा
स्त्रेतिहासेभ्यः प्रीतिपूर्वकं जायासम्मिततया नायकाव्युत्पत्तिकारित्वं पूर्वमेव निरूपितमस्माभिरिति नियुनक्ति भया
दिहलिखिते ॥ ननु शृङ्गाराङ्गनाभङ्ग्या यद्विभावादिनिरूपणमेतावतैव किं विनेयोन्मुखीकारः नन्वस्ति प्रकारान्तरमिति
नेत्याह शोभातिशयमिति अलंकारविशेषमुपमाप्रभृतिं पुष्यतीत्यर्थः स्वीकरोतीत्यर्थः ; यथोक्तं काव्यशोभाकर्तारो धर्मा गुणा

एवं च सति विनेयानुन्मुखीकर्तुं काव्यशोभार्थमेव वा तद्विरुद्धरसस्पर्शस्तदङ्गानां न दुष्यति ॥ शृङ्गारवि
रुद्धरसस्पर्शः शृङ्गाराङ्गानां यः स न केवलमविरोधलक्षणयोगे सति न दुष्यति शृङ्गाररसाङ्गैरुन्मुखीकृ
ताः सन्तो हि विनेयाः सुखं विनयोपदेशान् गृह्णन्ति ॥ सदाचारोपदेशरूपा हि नाटकादिगोष्ठी विनेयजनहिता
र्थमेव मुनिभिरवतारिता ॥ किं च शृङ्गारस्य सकलजनमनोभिरामत्वात्तदङ्गसमावेशः काव्ये शोभाति
शयं पुष्यतीत्यनेनापि प्रकारेण शृङ्गारविरोधिनि रसे शृङ्गाराङ्गसमावेशो न विरोधी सत्यं मनोरमा रामाः का
माः सत्यं रम्या विभूतयः किं तु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितम् इत्यादिषु नास्ति रसविरोधः ॥ ॥

स्तदतिशयहेतवस्त्वलंकारा इति मत्ताङ्गनेति अत्र हि शान्तविभावसमस्तानित्यत्वे वर्ण्यमाने न कस्यचिद्विभावस्य शृङ्गाराङ्गभङ्ग्या नि
बन्धः कृतः किं नु सत्यमिति पदद्वयानुप्रवेशेनोक्तिः ॥ न खल्वलीकवैराग्यकौतुकेन वीप्रकटयामः अपि तु यस्य कृते सर्वम
भ्यर्थ्यते तद्देवेदं चञ्चलमिति तत्र मत्ताङ्गनापाङ्गभङ्गस्येव लोलत्वं शृङ्गाराङ्गभावस्य सेव्यमानं विभावानुभावत्वेनाङ्गस्य लोलतायामुपमानत्वे
नोक्तेति प्रियतमाकटाक्षो हि सर्वस्याभिलषणीय इति तन्मनीत्या शब्दविमानं तत्र जिगीषिकया प्रस्तावानुप्रसक्त्वं वस्तुतत्त्वसंवेदने न

तदेतदुपसंहरन्नस्योक्तस्य प्रकारस्य फलमाह सूत्रम् ९४ रसादिविषयव्यंजकानि यानि वाच्यानि विभावादीनि वाचकानि
च हलमिजादीनि तेषां यन्निरूपणं तद्विषयस्येति रसादिविषयस्य तदिति उपयोगित्वम् मुख्यमिति यालोकार्थान्यत्र यत्नम् त
देवैतदुपदर्शनम् महाकवेरिति निसिद्धवत्फलनिरूपणम् एवंहि महाकविना तेनानुपेक्षणीयः इति सूत्रविशेषणामिति सूत्रं बे

विज्ञायेत्थं रसादीनामविरोधविरोधयोः विषयं सुकविः काव्यं कुर्वन्मुह्यति न क्वचित् इत्यमनेनानन्तरो
क्तेन प्रकारेण रसादीनां समभावनरसाभासादीनां परस्परं विरोध्यस्याविरोधस्य च विषयं परिज्ञाय सुकविः
काव्यविषयप्रतिभातिशययुक्तः काव्यं कुर्वन्न क्वचिन्मुह्यति ९४ एवं रसादिषु विरोधाविरोधनिरूपणस्यो
पयोगित्वं प्रतिपाद्य व्यंजकवाच्यवाचकनिरूपणस्यापि तद्विषयस्य तत्प्रतिपाद्यते वाच्यानां वाचकानां
च यदौचित्येन योजनम् रसादिविषयेणैतत्कर्म मुख्यं महाकवेः वाच्यानामिति सूत्रविशेषणं वाचका
नां च तद्विषयाणां रसादिविषयेणौचित्येन यद्योजनादेतन्महाकवेर्मुख्यं कर्म अयमेव हि कवेर्मुख्यो
व्यापारो यद्रसादीनामेव मुख्यतया काव्यार्थीकृतत्वात्तद्व्यक्त्यनुगुणत्वेन शब्दानामर्थानां चोपनिबंधनम् ९५

एवमयं न सर्वविशेषाः प्रागुक्ताः विभावानुभावसंचार्यौचित्यचारुणो विधिः कथाशरीरस्येत्यादिना काव्यार्थीकृत्येति प्र
न्यथालौकिकशास्त्रीयवस्त्वार्थेभ्यः काव्यविशेषः एतस्मिन्निर्णीतमार्गे योज्ये काव्यस्यात्मा सर्ववाच्येतरार्थो न चे ९५ ॥

ध्व.
लोच.
१२३
123

एतच्चेति यदस्माभिरुक्तमित्यर्थः। भरतादावित्यादिशब्देनालंकारशास्त्रेषु उद्भटादिप्रभृतयः। उक्तं भवति द्वयोरपि तयो
रिति लक्षणयोर्व्यवहारयोरित्यर्थः। जीवभूता इति हृदयम्। काव्यमात्रकाइति ब्रुवाणेन मुनिना रसोचितेति सूचितं समा
श्रयणोपदेशेन रसस्यैव जीवितत्वमुक्तं भामहादिभिश्च स्वादुकाव्यरसोन्मिश्रं वाक्यार्थमुपभुंजते प्रथमालीढमधवः
पिबन्ति कटु भेषजमित्यादिना रसोपयोगि जीवितं शास्त्रे इति लक्षणं व्यवहार उक्तः। शरीरभूतमिति इतिवृत्तं विना आस्वाद
शरीरमिति मन्तिः नाट्यं नाम यदेवमुक्तं माय ९९ गुणगुणिव्यवहार इति अस्मत्संमिश्रतया प्रतिभासनादसमयोर्मि व्यवहारो
एतच्च रसादितात्पर्येण काव्यनिबंधनं भरतादावपि सुप्रसिद्धमेवेति प्रतिपादयितुमाह रसाद्यनुगुणत्वेन
व्यवहारोऽर्थशब्दयोः। औचित्यवान्यस्ता एता वृत्तयो द्विविधाः स्थिताः। व्यवहारो हि वृत्तिरित्युच्यते तत्र रसानु
गुण औचित्यवान्वाच्याश्रयो यो व्यवहारस्ता एताः कैशिक्याद्या वृत्तयः वाचकाश्रयाश्चोपनागरिकाद्याः वृत्तयो हि रसा
दितात्पर्येण सन्निवेशिताः कामपि नाट्यस्य काव्यस्य च छायामावहन्ति रसादयो हि द्वयोरपि तयोर्जीवभूता इ
तिवृत्तादि तु शरीरभूतमेव ९९ अत्र केचिदाहुः गुणगुणिव्यवहारो रसादीनामितिवृत्तादिभिः सह न तु जीवशरी
रव्यवहारो रसादिमयं हि वाच्यं प्रतिभासते न तु रसादिभिः पृथग्भूतम् ९२ ॥
उक्तान्विति क्रमस्यासंवेदनादिति भावः अयमत्र इति शरूपार्थप्रासन्नत्वानमात्रेलोवनवद्यतद्रसादिना प्रतिपादितमदः ननु यद्य
प्यर्थसंपूर्णं तन्न प्रतिभासे सर्वस्य नियमेन भातीत्यनैकान्तिकमेतन्न माणिक्यधर्मा हि जात्यत्वलक्षणो विशेषो न प्रतिभासेऽपि सर्वस्य नि
यमेन भातीत्याशंकते स्यादिदेतन्नमाविहवति नैवमिति एतदुक्तं भवति अत्यन्तोऽमेयस्वभावत्वेऽसुनिततुर्थमंत्वादिति विशेषणमस्माभि
रुक्तम् तन्नग्ररूपतावनरूपवजात्यत्वस्य अत्यन्तलीनत्वभावत्वाद्रसादीनां वोन्मयताऽस्येवेति कविद्भुयमनेषु ९७ ॥ ॥ १२३

अस्मद्गुरवस्त्वाहुः इत्यनेनेदमुच्यते यदि रसादयो वाच्यानां धर्माः तथापि हि द्वौ पक्षौ रूपादिसदृशा वा स्युः मालिक
मत्वजात्यत्वसदृशा वा तत्राद्यस्तावदयमः पक्षः सर्वाभ्यतितथानवभासात् नापि द्वितीयः जात्यत्ववदनतिरिक्तत्वेनाशक्या
सनात् एषवेदन्तरापेक्षितदेवसंगच्छतएव ८८ तदाह अन्वयव्यतिरेकाभ्यां वाच्यप्रतीतिः। सर्वथानुपयोगिनी नतएव
हेतोः क्रमेणावश्यंभाव्यसहभूतयोरुपकारयोगात् सत्त्वसहृदयभावनाभ्यां साधुलक्ष्यते अन्यथा तल्लक्ष्यते पीतत्वं शंक
श्वेतोच्यते यदि रसादिमयमेव काव्ये रूपागौरवमयं शरीरे एवं सति यथा शरीरे प्रतिभासमाने नियमेन तत्र
रत्वं प्रतिभासते सर्वस्य तथा वाच्येन सहैव रसादयोपि सहृदयस्य सहृदयस्य प्रतिभासेरन् न चैवं तथा वि
नत्वप्रतिपत्तिमेव प्रथमं उद्योते ८८ स्यान्मतं रत्नानामिव जात्यत्वं प्रतिपत्तृविशेषसंवेद्यं वाच्यानां सादि
रूपमिति तथैव यतो यथा जात्यत्वेन प्रतिभासमाने रत्नस्वरूपानतिरिक्तत्वमेव तस्य लक्ष्यते तथा रसादीनां
मपि विभावानुभावादिरूपवाच्याव्यतिरिक्तत्वमेव लक्ष्येत न चैवं नहि विभावानुभावव्यभिचारिण एव रसा
इति कस्यचिदवगमः अत एव च विनाभावादिप्रतीतिविनाभाविनी रसादीनां प्रतीतिरिति तत्प्रतीतिः कार्यकार
णभावेनावस्थानात् क्रमावश्यंभावी सतु लाघवात् अप्रकाशित इत्यलक्ष्यक्रमा एवमलंकारव्यंग्या रसादयस्स
यस्यापि प्रतीतिविशेषात्मैव रसाद्यवगतिः शाकुनस्यापि व्यपदेशिवत्तादृशसादीनां प्रतीतिरित्येवमुन्मादेन न भवेत्तु वाच्याद
तिरिक्तो रसादयः तत्रापि क्रमो लक्ष्यत इति नावश्यमेवोक्तं तत्कास्येनेव प्रमाणेन वाज्यितिमन्वयव्यतिरेकाभ्यामवधीयते तस्मिन्नरे
णरसप्रतीतावुभयस्य पदविग्रहस्य लाघवा शङ्कमात्रोपयोगकृतस्यदर्शनात् न तस्य तत्रैककर्येव सामग्र्या सहैव वाच्यव्यङ्ग्याभि

ध्व.
लोच.
१२५
125

तदाह यत्रापीति गीतशब्दानामर्थोऽस्ति तत्रापि तत्प्रतीतिस्तदनुपयोगिनी प्रसरणात् स्वरेणापदस्ति तु वाच्यमनुसारतयापि सो
दयदर्शनात् न चापि सा सर्वस्य भवतीति दृश्यते तदेतदाह न च तेषामिति गीतादिशब्दानां स्वरादिशब्देन वा मध्यशब्दविलपित
शब्दादयो निर्दिष्टाः ७ अनुमतमिति यत्रार्थः शब्दो वेति सैवावमिति भावः न तर्हीति न तस्य गीतस्य देवार्थावगमे वितैवस्मा

ननु शब्द एव प्रकरणाद्यवच्छिन्नो वाच्यव्यङ्ग्ययोः सममेव प्रतीतिमुपजनयतीति किं तत्र क्रमकल्पनया नहि।
शब्दस्य वाच्यप्रतीतिपरामर्श एव व्यञ्जकत्वे निबन्धनम् तथा हि गीतादिशब्देभ्योऽपि रसाभिव्यक्तिरस्ति न चैत
षामन्तरा वाच्यप्रतीतिपरामर्शः ७ अत्रापि ब्रूमः प्रकरणाद्यवच्छेदेन व्यञ्जकत्वं शब्दानामित्यनुमतमेवैतद
स्माकम् किं तु तद्व्यञ्जकत्वं तेषां कदाचित्स्वरूपविशेषनिबन्धनम् कदाचिद्वाचकशक्तिनिबन्धनम्
तत्र येषां वाचकशक्तिनिबन्धनं तेषां यदि वाच्यप्रतीतिमन्तरेणैव स्वरूपप्रतीत्या निष्पन्नं तद्भवेन्न तर्हि वा
चकशक्तिनिबन्धनम् अथ तन्निबन्धनं तन्नियमेनैव वाच्यवाचकभावप्रतीत्युत्तरकालत्वं व्यङ्ग्यप्रतीतेः प्रा
प्तमेव स तु क्रमो यदि लाघवान्न लक्ष्यते तत्किं क्रियते ७१॥

= ९

भासः स्यात् काव्यशब्देभ्यः नचैवमिति वाचकशक्तिरपि न तथापेक्षणीया सा च वाच्यनिष्ठैवेति शब्दव्याच्यप्रतिपत्तिरिसुप
गतव्यम् तदाह अथेति सैव हि वाचकशक्तिरित्युच्यते यत्तदुक्तं भवति माभूद्वाच्यरसादिव्यंजकमस्तु शब्दादेव तत्प्रती
तिः तथापि तेन स्ववाचकशक्तिः न स्वांकर्तव्या यां सहकारिणं या वाच्यापेक्षणीये स्यात् ते वाच्यप्रतीतेः पूर्वभावित्वमिति

१२८

ननु गीतशब्दवदेव वाचकशक्तिरित्यत्राप्यनुपयोगिनी यन्नुक्तं विलम्बेऽपि काव्यरसप्रतीतिर्न भवति तज्ज्ञोचितःप्रकरणावग
मादिः सहकारी नास्तीत्याशंक्याह प्रकरणावगमो हि किमुच्यते किं वाक्यान्तरसहायत्वम् अथवा वाक्यान्तराणामपि वाच्यमु
भयपरित्यागेनापि न भवति प्रकृतवाक्यार्थभेदेन रसोदयः स्वयमिति प्रकरणमात्रेण परेणापि केन विशेषो व्याख्यातमिति भावः
न चान्वयव्यतिरेकवर्ती वाच्यप्रतीतिमपह्नुत्याह दृष्टमज्ञानाभावे पारणत्वेनापि तेनात्मस्थितरूपिकं किं विनयस्थीनेनभिप्रायः २२
ननु तत्र वाच्यप्रतीतेरुपयोगः क्रमाभ्युपगमेन किं प्रयोजनम् सद्भावमात्रमेवास्तूपयोग एकसामग्र्यधीनतात्तत्त्वादित्याशं

यदि वाच्यप्रतीतिमन्तरेणैव प्रकरणाद्यवच्छिन्नशब्दमात्रसाध्या रसादिप्रतीतिः स्यात् तदनवधारितप्र
करणानां वाच्यवाचकभावे च स्वयमव्युत्पन्नानां प्रतिपत्तॄणां काव्यमात्रश्रवणादेवासौ भवेत् २२ स
हभावे च वाच्यप्रतीतेरनुपयोगः उपयोगे वा न सहभावः २३ येषामपि स्वरूपविशेषप्रतीतिनिमित्तं व्यंज
कत्वं यथा गीतशब्दानां तेषामपि स्वरूपप्रतीतेर्व्यंग्यप्रतीतेश्च नियमभावी क्रमः ॥

क्याह एवं ह्यनुपयोग इत्यनुपकारके सन्नाकरणमात्रं वस्तुस्वरूपं स्यादिति भावः २३ उपकारिणो हि पूर्वभावित्वेनि
यमाप्यङ्गीकृतमित्याह दृष्टान्तेनैवैवं वाच्यप्रतीतेरपि पूर्वभावित्वं समर्थयिष्याम इति भावः ननु संश्चेत्क्रमः
किं न लक्ष्यत इत्याशंक्याह तस्मिन्निति क्रियापौर्वापर्यमित्यनेन क्रमस्य स्वरूपमाह क्रियत इति क्रिये वाच्यव्यंग्यप्रतीती
यदि वाभिधाव्यापारो व्यंजनपर्यालोचनव्यापारश्चेति क्रिये तयोः पौर्वापर्यं न प्रतीयते केनेत्याह रसादौ विषये की

ध्व.
लोच.
१२५
125

दृशि अभिधेयान्तरादभिधेयविशेषाद्धि लक्षणे सर्वथैवानभिधेयेनेन भवितव्यं तावत्क्रमेण सुक्रम यथा वाच्येन ता
द्वेऽपि तित्तलक्ष्यत इत्यर्थः ; अतो न लक्ष्यत इति निमित्ते लक्ष्यत इत्यर्थः ; अतो न लक्ष्यत इति निमित्तसप्तमीति दि
ष्टेह तत्र गर्भीकृत्य माह शब्दभाविनीष्वनन्यसाध्यतत्फलघटनासु घटनाः पूर्वं माधुर्यादिलक्षणाः प्रतिपादिता
गुणनिरूपणावसरे तास्वनन्यफलाद्रसादिप्रतीतिः फलं यासां तथान्यत्तद्वत्साध्यं यासां न सौजो घटना याः कु
हलादिप्रतीतिः साध्या यत्र उक्रमभवति यतो गुणवति काव्ये संकीर्णविषयतया संघटनाश्रयत्वात्ततः क्रमो न लक्ष्यते
शाह शब्दभाविनीष्वाच्यप्रतीतिकालप्रतीतिक्षणे तद्विवेक स्फुटीत्वे - रसादीन्भावयन्तीति तदास्वादे विदधतीत्यर्थः । प
तदुक्तं भवति संघटनाव्यापारत्याद्रसादीनामनुपपत्त्यर्थविज्ञाने पूर्वमेवोचितासंघटनाश्रवणसमयपर्यवसित आह वि

तत्र शब्दस्य क्रियापौर्वापर्यमनन्यसाध्यतत्फलघटनास्वाशुभाविनीषु वाच्याविरोधिन्यभिधेयान्तरविलक्ष
णो रसादिः स्वादः शुक्लोऽपि पश्चात्कृत्य तत्र णे रसादौ न प्रतीयते ॥ २४ ॥ वेन भवति अभ्यस्ते हि विषये विनाभावप्रतीतिः क्रमस्यैव
वेन लक्ष्यते अभ्यासोदयमेव यत्स्त्राणिधानादिनापि विनैव संस्कारबलवशात्सैव पूर्वमनुस्मृत्य न यथा स्वापनमिवेयत्र धूमस्य
वह्निरिति तित्व दर्शनानां याः पत्नुपगन्ता न मात्रमेवो पयोगि भवतीति परामर्शस्यानमाक्रमति अपि तु तत्र प्रथम
महानेन तत्त्वानि स्मृत्य चक्तेः विजातीयधूम धावानुस्मरणादिप्रतीत्येतरानुभूतेश विरहाद्भ्राविन्यामपि प्रतीतौ क्रमो न
लक्ष्यते नहि हि दोषि यदि तद्वाच्याविरोधीरसो न स्यादुविनाव घटनानभवे नहृदयस्यैव क्रम इति वेद्विकाका स्वयं परिदित मनुप
व्ययीति न्याये नगजे निमीलिकया व्याचष्टे तस्य शब्दस्य फलं नहि फलं वाच्य अपप्रतीत्या लकं तस्य घटना निष्पादनाय
तेनान्यसाध्या शब्दव्यापारो केनजन्येति न वाच्यार्थसमं तंद्व्याख्याने न किंचिदसमर्पणमस्य तत्सर्वं वंद्यै । तद्रविवादे नवजना २४

यत्र तु संघटनाव्यंग्यत्वादिना क्विनत्व लक्ष्यत्वं न प्रवेशयति स्फुटमेवेति विवक्षिताभिधेयस्य पदवाक्यप्रकाशता तदन्यस्यानु
रणनरूपव्यंग्यस्य ध्वनेरिति । एवं वर्णसंघटनादिकं नास्य व्यंजकत्वेनोक्तमिति भावः गाथाश्चेति तु मधुमिश्र इत्यादि
कास्तताश्च न चैव व्याख्याताः । गाथाम्मिति गाथाम्मयी स्वर्धः उपमावाचकाय यथेव वादिः अर्थसामर्थ्यादिति वाक्यार्थसा

क्वचित्तु लक्ष्यतया यथानुरणनरूपव्यंग्यप्रतीतिस्तु न त्रापि कथमिति चेदुच्यते अर्थशक्तिमूलानुरण
नरूपव्यंग्यध्वनौ तावदभिधेयस्य तत्सामर्थ्याक्षिप्तस्य चार्थस्याभिधेयान्तरविलक्षणस्य यत्प्रतीतेः प्रथम
निह्नवो निमित्तनिमित्तिभाव इति स्फुटमेव तत्र पौर्वापर्यम् यथा प्रथम उद्योते प्रतीयमानार्थसिद्ध्यर्थमु
दाहृतासु गाथासु तथाविधेव विषये वाच्यव्यंग्ययोः सतत विलक्षणत्वात् यं वक्तव्यप्रतीतिः सैव तस्येति न श
क्यते वक्तुम् शब्दशक्तिमूलानुरणनरूपव्यंग्ये ध्वनौ गावो वः पावनानाम् परमपरिमितां प्रीतिमुत्पादय
न्त्वित्यादावर्थद्वये प्रतीतौ शाब्दसामर्थ्यावहृदयस्योपमाद्यायेन मावप्रतीतिरुपमावाचकपदविरहेऽपि साम
र्थ्यादाक्षिप्तेति तत्रापि सुलक्षमभिधेयव्यंग्ययोरलंकारप्रतीत्योः पौर्वापर्यम् । १५ पदप्रकाशशब्दशक्तिमूलानु
रणनरूपव्यंग्यविधनौ विशेषणपदस्योभयार्थसम्बन्धयोग्यस्य योजकपदमन्तरेण योजनम् शाब्दमर्थादवस्थित
मित्यत्रापि पूर्ववदभिधेयतत्सामर्थ्याक्षिप्तालंकारमात्रप्रतीत्योः सुस्थितमेव पौर्वापर्यम् ।१९ ॥

सामर्थ्यादिति तावत् ३५ एवं वाक्यप्रकाशमर्थशक्तिमूलं विचार्य पदप्रकाशं विचारयति विशेषणपदस्येति सूत्र इति सूत्रमिति वोभय
समानाधिकरणतया संबन्धे अभिधेयं तत्सामर्थ्याक्षिप्तं च तयोरलंकारमात्रयोः प्रतीतयोः पौर्वापर्यक्रमः सुस्थित एव लक्ष्यमित्यर्थः

नन्वेवमार्थत्वे शाब्दशक्तिमूलत्वं चेति कथमित्याशङ्क्याह नात्र विरोधः कश्चिदिति भावः यतस्त्वचितत्वमस्य पूर्वमेव निर्णीतमि
ति न पुनरुच्यते स्वविषय इति स्वस्य शब्दादेरुपदर्शनव्युत्पत्त्यादिः स्वो विषयः तत्र यद्यप्यनुरूप्यमतादर इत्यर्थः विचारेण न कृतस्त
त्तिनामधेयत्वनिरूपणद्वारेणाविरोधः सङ्कृताभावस्य शक्तिनेमप्यत्राश्रुतत्वादिति भावः एवं स्मादृशः कैशिक्यादीनामभिनेतृत्व
भागरूपाणां वृत्तीनां जीवितभूतनागरिकादीनां सर्वस्य स्वस्यावभयवृत्तिर्जीवद्रारस्य रसादिरिन यद्यपि तद्विषयत्वादिति यद्यपि त
ते तत्स्वसंयोगेन रसादीनां वाच्यातिरिक्तत्वं समर्थयितुं क्रमो विवक्षित इत्येतदुपसंहरति अभिधानस्य शब्दरूपस्य पूर्वं प्र

त्यर्थ्यापि च प्रतीतिरित्यभिधेये विषये उभयार्थसंबन्धयोग्यशब्दसामर्थ्यप्रसवभूतेति शब्दमूलालंकारस्य तेषु
विवक्षितवाच्यस्यानुध्वनेः प्रसिद्धस्वविषयत्वे मुख्यप्रतीतिरेवं क्रमेणार्थान्तरप्रकाशनमिति नियमभावी
क्रमः तत्र तु विवक्षितवाच्यत्वादेव वाच्यान्तरस्य व्यङ्ग्यस्य क्रमप्रतीतिर्विचारेण न कृतः ७२ तस्मादभिधाना
भिधेयप्रतीत्योरिव वाच्यव्यङ्ग्यप्रतीत्योर्निमित्तनिमित्तिभावान्नियमभावी क्रमः स तूक्तयुक्त्या क्वचिल्लक्ष्यते
क्वचिन्न लक्ष्यते ७८॥

तीतिः ततोऽभिधेयस्य पदार्थं तत्र भवान् विषयत्वमनापन्नेः शाब्दैर्नार्थः प्रकाशयते इत्यादि प्रतीतिर्णीतं तद्रूपत्वात्किमा
दैत्यभिधीयते अत्रापि चाविनाभावविवक्षासमयस्याभ्यस्तत्वात्क्रमो न लक्ष्यतापि उद्योतान्तरे भेदे उक्तं व्यञ्जकमुखेन ध्वनेः स्वरू
पप्रतिपादने ७८ इत्यतो मुपसंहरन् व्यञ्जकभावे प्रथमोद्योते समर्थितमपि शिष्याणामेकप्रघट्टके नस्फुटीकर्तुं पुनरावर्तयति

कश्चिदिति मीमांसकादिः किमिदमिति वक्ष्यमाणोपेक्षकस्याभिप्रायः प्रागेवेति प्रथमोद्योते भाववादनिराकरणेऽस्य तस्य
व्यंजकत्वसिद्धान्तसिद्धेः येनान्यो व्याख्यायते केनापि हेतुत्वेन तस्य साधितत्वादिति भावः तदाह तत्सिद्धौ निमित्तमिति श्र
स्वसोऽहितीयोर्थस्य स्वपरिव्यंग्य इति नामकृतं वाच्यं इत्यपि कस्मात्क्रियते व्यंग्य इति वाचा अभिमतस्यापि कस्मात्क्रि

तदेवं व्यंजकत्वेन ध्वनिप्रकारेषु निरूपितेषु कश्चिद्ब्रूयात् किमिदं व्यंजकत्वं नाम व्यंग्यार्थप्रकाश
नं हि व्यंजकत्वं व्यंग्यत्वं चार्थस्य व्यंजकसिद्ध्यधीनम् व्यंग्यापेक्षया व्यंजकसिद्धिरित्यन्योन्याश्रयाद
व्यवस्थानम् ननु वाच्यव्यतिरिक्तस्य व्यंग्यस्य सिद्धिः प्रागेव प्रतिपादिता तत्तत्सिद्ध्यधीना व्यंजकसिद्धि
रिति कः पर्यनुयोगावसरः सत्यमेतत् प्रागुक्तयुक्तिभिर्वाच्यव्यतिरिक्तस्य वस्तुनः सिद्धिः कृता स
त्वर्थो व्यंग्यतयैव कस्माद्व्यपदिश्यते यत्र च प्राधान्येनावस्थानं तत्र वाच्यतयैवासौ व्यपदेष्टुं युक्तः
तत्परत्वाद्वाचकत्वस्य अतश्च तत्प्रकाशिनो वाच्यस्य वाचकत्वमेव व्यापारः किं तस्य व्यापारान्तरपरि
कल्पनया तस्मात्तात्पर्यविषयो योऽर्थः स तावन्मुख्यतया वाच्यः या त्वन्तरा तथाविधे विषये वाच्यान्तरप्रतीति
सा तत्प्रतीतेरुपायमात्रं पदार्थप्रतीतिरिव वाक्यार्थप्रतीतेः ॥ ३१ ॥

यते अत्र गम्यमानत्वेन हि शङ्क्यार्थत्वं तदेव वाचकत्वमभिधायित्वस्य यत्नात् चैवाभिधायकत्वं सचिवेतनस्य यत्ननामाभिधा
नभूते तस्मिन्नर्थ इति सर्वाभिषिक्तेऽर्थे निरूपिते रूपतश्चैवाभिधाव्यापारेणाभिविवक्षिते तदाह यत्र चेति तत्प्रकाशिन इ
ति तद्व्यंग्याभिमतप्रकाशनपरस्य वचसो यद्वाक्यं स इति उपायमात्रमपि सन्नेन प्रधानत्वोऽत्रामत्र प्रभाकरवैयाकरणोक्तवद्

ध· लोत·
१२२
127

ह्रवपति भाट्टमते हि वाक्यार्थमन्वयेते षां पदानां नतीयकक्षत्वं पाके ज्वालेव काष्ठानां पदार्थः इति पाइनमिति शाश्च वमानै
पदार्थैस्तात्पर्ययोग्यतयाक्षिप्यते स एव वाक्य इति प्रभाकरदर्शनेपि दीर्घदीर्घो निमित्तिनि वाक्येऽर्थे पदार्थानां निमित्त
भावः पारमार्थिक इति विशेषः एव वैयाकरणानां तु पारमार्थिक इति विशेषः एतच्चास्माभिः प्रथमोद्योते निर्णीतमेव

उच्यते यत्र शब्दः स्वार्थमभिदधानोऽर्थान्तरमवगमयति तत्र यत्तस्य स्वार्थाभिधायित्वं यच्च तदर्थान्तरावगम
हेतुत्वं तयोरविशेषो विशेषो वा न तावदविशेषः यस्मात्तौ द्वौ व्यापारौ भिन्नविषयौ भिन्नरूपौ च प्रतीयेते एव न
था हि वाचकत्वलक्षणो व्यापारः शब्दस्य स्वार्थविषयो गमकत्वलक्षणस्त्वर्थान्तरविषयः न च स्वपरव्यवहारो
वाच्यव्यङ्ग्ययोरपह्नोतुं शक्यः एकस्य संबंधित्वेन प्रतीतेरपरस्य संबंधिसंबंधित्वेन वाच्यो ह्यर्थः साक्षा
च्छब्दस्य संबंधी तदितरस्त्वभिधेयसामर्थ्याक्षिप्तः संबंधिसंबंधी यदि हि स्वसंबंधित्वं साक्षात्तस्य स्यात्तदार्थान्तरत्वव्य
वहार एव न स्यात् तस्माद्विषयभेदस्तावत्तयोर्व्यापारयोः सुप्रसिद्धः रूपभेदव्यवहारोऽपि प्रसिद्ध एव

८॥

वेति न पुनरायासेनाप्रयोजनेन वक्तुं क्रियते ॥ ननु ॥ येऽपूर्वपदे योज्यं ७५ उच्चेति एवंपदे उच्यते इति सिद्धान्तः वाचकत्वं
स्वगमकं चेति स्वरूपतो भेदः स्वार्थ ॥ वेवक्रमेणेति विवक्षितो ननु तस्मात्स्वदसो ॥ कथं चेति एवकाराभिप्रायः नैव
स्यादित्यर्थः तावत्तान साक्षात्संबंधित्वेनेव शुद्धार्थस्यैकस्य वाभिधालक्षणो व्यापार इत्याशंकारूपभेदमुक्तः ८॥ १२२

तत्र भिन्ने विषये न शब्दादेर्वर्द्धर्यापीति प्रसिद्धमेव दर्शयति विप्रतिषिद्धमनुपतिदेतमाह अवाचकस्यापीति यदेव वाच
कत्वं तदेव गमकत्वं यदि स्यात् अवाचकस्य गमकत्वमपि न स्यात् गमकत्वेनैव वाचकत्वमपि न स्यात् न चैतदुभयमपि।

नहि येवाभिधानशक्तिः सैवावगमनशक्तिः अवाचकस्यापि गीतशब्दादेः रसादिलक्षणार्थावगमद
र्शनात् अशब्दस्यापि चेष्टादेरर्थविशेषप्रकाशनप्रसिद्धेः तथा व्रीडायोगान्नतवदनया सखिरिश्लोके चेष्टा
विशेषः सुकविनार्थविशेषप्रकाशनहेतुः प्रदर्शित एव ८१ तस्माद्भिन्नविषयत्वाद्भिन्नरूपत्वा
च्च स्वार्थाभिधायित्वमर्थान्तरावगमहेतुत्वं च शब्दस्य यत्तयोः स्पष्ट एव भेदः विशेषश्चेत्तर्हि इदानी
मवगमनीयस्याभिधेयसामर्थ्याक्षिप्तस्यार्थान्तरस्य वाच्यत्वव्यपदेश्यता शब्दव्यापारविषयत्वं तु तस्या
स्त्यभिविष्यत एव तत्त्वव्यंग्यत्वेनैव न वाच्यत्वेन ८२॥

गीतशब्दे शब्दव्यतिरिक्ते चाथो वक्तृत्वऋचकं पनवाप्यादौ न स्यावाचकस्याप्यवगमकारित्वदर्शनादवगमकारिणोपि वाचा
वाचकत्वेन प्रसिद्धत्वाद्धिति तात्पर्यं ८२ एतदुपसंहरति न तर्हीति वाच्यत्वेनाभिधाव्यापारविषयतातथात्वेन तु सिद्धसाधन

ननु गीतादौ माभूद्वाचकत्वं शंको व्यञ्जकत्वमस्त्वित्याशंक्याह पाश्चान्तरेणेत्य स्वार्थान्तरस्य यद्विषयीकरणं तत्र प्रकाशनोक्तिरेव यु
क्ता न वाचकोक्तिः शब्दस्य नापि वाच्यत्वोक्तिरर्थस्य तत्र युक्ता वाचकत्वं हि समयवशादव्यवधानेन प्रतिपादकत्वं तच्चात्र स्व
वशब्दस्य स्वार्थेनानादाह स्वार्थाभिधायिनेति वाच्यत्वं समयबलेनानिर्व्यवधानं प्रतिपाद्यत्वं प्रयातं स्वेवार्थस्य शब्दान्तरप्रति
नदाह प्रसिद्धेरिति प्रसिद्धेर्वाचकतयाभिधानान्तरेणायः संबन्धो वाच्यत्वं तदेव तत्र योग्यत्वं तेनोपलक्षितस्य न चैवंविधं

प्रसिद्धाभिधानान्तरसंबन्धयोग्यत्वेनवतस्तार्थान्तरस्य प्रतीतेः शब्दान्तरेण स्वाभिधायिना यद्विषयीकर
णं तत्र प्रकाशनोक्तिरेव युक्ता ॥ ८३ ॥ न च पदार्थवाक्यार्थन्यायो वाच्यसंगयोः यतः पदार्थप्रतीतिरत्रास्मे
वेति कैश्चिद्धि दृष्टिराश्रितम् ॥ ८४ ॥ येषामप्यसत्यता स्यान्नाभ्युपगते तैर्वाक्यार्थपदार्थयोर्यं ट तदुपाटा
न करणाभ्यायोऽभ्युपगतव्यः ॥ ८५ ॥

वाचकत्वमर्थं प्रतिशब्दस्य ह्यास्तिनापि तं शब्दप्रतीतस्यार्थस्याक्षरूपं वाच्यत्वम् पूर्विनर्हि नास्तिकत्वं तस्य विषयी
करणमुक्तमित्याशंक्याह प्रतीतेरितिपृथाव प्रतीयते सोर्थान्तवाच्यवाचकव्यापारेणेति विलक्षणप्रकाशव्यापार
इति यावत् ८३ नन्वेवं माभूत् वाचकशक्तिस्तथापि तात्पर्यशक्तिर्भविष्यतीत्याशंक्याह केश्चिदिति वैयाकरणैः ८४ ये

तमेवन्यायंव्याचष्टे तदुपादानकारणानामितिसमवायिकारणानिकापिलानिस्वतयोक्तानिरूपितानिसौगतनकापि
लमेतनुयद्युपादानव्यवटकालेउपादानानांनसत्तापक्षेत्वणवयितेनपरंचतिरोभूतत्वेनतथापिघटयदुपादानात्स्वुप
लंभइतीयंतृशेषदृष्टांतःदूरीभवेदिति अर्थैकत्वस्याभावादितिभावः ८९ एवंपदार्थवाक्यार्थन्यायेनान्वयशक्तिसाधके
प्रक्रमेतेविषयेनिराकृत्याभिमतांप्रकाशशक्तिसाधयितुंतदुपवितंप्रदीपघटन्यायंप्रक्रमेतेयोजयन्नाह यथासौपदार्थवा

यथाहिघटेनिष्पन्नेतदुपादानकारणानांनपृथगुपलंभः तथैववाक्येतदर्थेवावगतेतेपदतदर्थानांतेषांहि
तदविभक्तत्वेनोपलंभेवाक्यवाक्यार्थबुद्धिरेवदूरीभवेत् नतेषांघटवाच्यपोऽत्रायाः नहिघटेप्रतीयमा
नेवाक्येबुद्धिर्दूरीभवति वाक्याभासाविनाभावेनतस्यप्रकाशनात् ८९ तस्मात्दृष्टप्रदीपन्यायस्तयो
र्येवहिप्रदीपद्वारेणघटप्रतीतौप्रधुपत्त्याननप्रदीपप्रकाशोनिवर्ततेतद्वद्घटप्रतीतौवाक्यावभासः
८७ यत्नप्रथममउद्योते यथापदार्थद्वारेणेत्यादिग्रन्थेनउपपादितमात्मसाम्यविवक्षया ८८॥

वाक्यार्थन्यायेनेदमुक्तमस्मात्प्रकृतंन्यायम् व्याकरणपूर्वकंदार्ष्टान्तिकेयोजयति यथाहीति ८७ ननुपूर्वमुक्तंयथापदार्थद्वा
रेणवाक्यार्थःसंप्रतीयते वाक्यार्थपूर्विकातद्वत्प्रतिपत्तिर्हिवस्तुनष्टमितिनत्वर्थसमवन्यायइह यत्नेननिराकृतइत्याशंक्या
ह तदितिनित्वसम्ययथासाम्येनेत्यर्थः ८८॥

एवमितिप्रदीपच्छटवद्गुणपदभयाभासप्रकारेणेत्यर्थः तस्याइतिवाच्यतयैकार्थ्यं स्वलक्षणं व्यर्थैकत्वाद्विवक्षामेक
मुक्तं सत्कृत्य नहि शब्दोऽयमेव समयस्मृतिं करोतीति स्वेच्छते नैवावगमितस्तद्धि रस्य व्यापाराभावात्समयस्मरणांववह
नीयगणदयोगाकोऽपि भेदस्यावसरः पुनः कृतस्तु स्मृतोनामासाविति भावः ८९ तयोरिति वाच्यव्यंग्ययोः तत्रेति उभ
योः प्रकारयोर्मध्यात्प्रथमः प्रकार इत्यर्थः प्रकारान्तरमिति गुणीभूतव्यंग्यसंज्ञितं व्यंग्यत्वमेवेति प्रकाशत्वमे

नन्वेवं गुणपदार्थद्वयोरपि तं वाच्यस्य प्राप्ते तद्भावे च तस्य वाच्यतैव घटते तस्याप्रकाश्यलक्षणत्वात् ८९ नैष
दोषः गुणप्रधानभावेन तयोर्व्यवस्थानात् व्यंग्यस्य हि क्वचित्प्राधान्ये वाच्यस्योपसर्जनीभावः क्वचित्तु वाच्यस्य
प्राधान्यमितरस्य गुणीभावः तत्र व्यंग्यप्राधान्ये ध्वनिरित्युक्तमेव वाच्यप्राधान्ये तु प्रकारान्तरं निर्देक्ष्यते त
स्मात्स्थितमेतत् व्यंग्यपरत्वेऽपि काव्यस्य न व्यंग्यस्याभिधेयत्वमपि तु व्यंग्यत्वमेव ९० किं च व्यंग्यस्य
प्राधान्येन विवक्षायां वाच्यत्वं तावद्भवद्भिर्नाभ्युपगन्तव्यमतत्परत्वाच्छब्दस्य तदस्ति तावद्व्यंग्यः शब्दानां क
श्चिद्विषय इति ९१ यत्रापि तस्य प्राधान्यं तत्रापि किमिति तस्य स्वरूपमपह्नूयते ९२ एवं तावद्वाचकत्वाद
न्यदेव व्यंजकत्वम् ९३॥

वेत्यर्थः ९० ननु यत्परः शब्दः स शब्दार्थ इति व्यंग्यस्य प्राधान्ये वाच्यत्वमेव न्याय्यम् तर्हि प्राधान्ये किमुक्तं व्यंग्यत्वमिति
चेत्सिद्धान्तः पक्षयन्नाह नतु प्राधान्ये माभूद्व्यंग्यत्वमित्याशंक्याह ९१ युक्तो नवैवं सर्वेष्वपि संबन्धित्वमनुपपत्रं समयत्वमि
ति व्यंग्यतायांनिवेयतं तस्य प्राधान्येऽपि विघटत इति स्वरूपमहेयमेवेति भावः ९२ तदुपसंहरति विषयभेदेन चेत्यर्थः ९३

तावदिति वक्रव्याख्यानेनैतं सूचयति तदेवाह अनेनेति सामग्रीभेदात्कारणभेदोऽप्यस्तीति दर्शयति एतच्च वितत्य ध्वनिलक्ष
णप्रस्तावे शब्दो वेति वाग्लक्षणं यद्युक्तमिति चद्विवचनं व्याचक्षाणैरस्माभिः प्रथमोद्योत एव दर्शितमिति न पुनर्वितायते ५४

इत्थं चावाचकत्वाद्व्यञ्जकत्वस्यान्यत्वं यद्वाचकत्वे शब्दैकाश्रयम् इतरत्तु शब्दाश्रयमर्थाश्रयं च द्वयोरपि व्यञ्
जकत्वस्य प्रतिपादितत्वात् ५४ गुणवृत्तिरुपचारेण लक्षणया चोभयाश्रयापि भवति किं तु ततोऽपि
व्यञ्जकत्वं स्वरूपतो विषयतश्च भिद्यते रूपभेदस्तावदयं यदमुख्यतया व्यापारः गुणवृत्तिः प्रसिद्धा व्यञ्ज
कत्वं न मुख्यतयैव शब्दस्य व्यापारः ५५ ॥

एवंविधप्रभेदात् स्वरूपभेदात्कारणभेदाच्चावाचकत्वान्मुख्यामुख्याश्रितत्वभेदं प्रतिपाद्योभयाश्रयत्वाविशेषात्तर्हि व्यञ्
जकत्वगौणयोः कोऽभेद इत्याशङ्क्याभ्युच्चयोऽपि प्रतिपादयितुमाह व्यञ्जकत्वं तु मुख्यतयैव शब्दस्य व्यापारः ५५ ॥

उभयाश्रयापीति पाठाश्रया उपचारलक्षणयोः प्रथमोद्दिष्टान एव विभजति निर्णीतं स्वरूपमिति पुनर्लिख्यते मुख्यत्वेनैव स्य।

न हि व्यंग्यत्रयप्रतीतिर्या तस्या अमुख्यत्वं मनागपि लक्ष्यते अयं चास्य स्वरूपभेदो यद्गुणवृत्तिरमुख्यत्वे
न व्यवस्थितं वाचकत्वमेवाश्रीयते व्यंजकत्वं तु वाचकत्वादत्यन्तं विभिन्नम् एतच्च प्रतिपादितम् अयं चापरो रूपभे
दो यद्गुणवृत्तौ यदार्थोऽर्थान्तरं लक्षयति तदोपलक्षणीयार्थात्मना परिणत एवासौ संपद्यते यथा गंगायां घोष इ
त्यादौ यदा व्यंजकमार्गे यदार्थोऽर्थान्तरं द्योतयति तदा स्वरूपं प्रकाशयन्नेवासावन्यस्य प्रकाशकः प्रतीयते प्रदी
पवत् यथा लीलाकमलपत्राणि गणयामास पार्वती इत्यादौ यदि च यत्रातिरस्कृतस्वरूपप्रतीतिरर्थोऽर्थान्तरं ल
क्षयति तत्र लक्षणाव्यवहारः क्रियते तदेवं सति लक्षणैव मुख्यः शब्दव्यापार इति प्राप्तम् यस्मात्प्राये
ण वाक्यानां वाच्यव्यतिरिक्ततात्पर्यविषयार्थावभासित्वम् ननु त्वत्पक्षेऽपि यदार्थो व्यंग्यत्रयं प्रका
शयति तदा शब्दस्य कीदृशो व्यापारः उच्यते प्रकरणाद्यवच्छिन्नशब्दवशेनैव वाच्यस्य तथाविधं व्यंजक
त्वमिति शब्दस्य तत्रोपयोगः कथमपह्नूयते विषयभेदोऽपि गुणवृत्तिव्यंजकत्वयोः स्फुट एव यतो व्यंजक
त्वस्य रसादयोऽलंकारविशेषा व्यंग्यरूपावच्छिन्नं वस्तु चेति त्रयं विषयः ॥

सर्वलक्षणविलेनेत्यर्थः व्यंग्यत्रयं वस्त्वलंकाररसात्मकं वाचकत्वमेवेति न त्रापि हि तथैव समयोपयोगोऽस्येत्य प्रति
पादितमिति इदानीमेव परिगणनइति ॥

मुख्येन वा न वा प्रकारांतरस्याभावान्मुख्यत्वे वाचकत्वमन्यथा गुणवृत्तिः गौणे निमित्तं सादृश्यादि न ह्यविकारवृत्तिः शाब्दस
मापारो गुणवृत्तिरिति भावः ॥ मुख्य एवासौ व्यापारः सामग्रीभेदाश्च वाचकत्वान्नातिरिच्यत इत्यभिप्रायेणाह उच्यत इति प
तत्र रसादिप्रतीतिर्गुणवृत्तिरिति न केनचिदुच्यते न च शक्यते वक्तुं व्यंग्यालंकारप्रतीतिरपि तथैव वस्तुचवा
रुत्वप्रतीतिर्न यत्स्वशब्दानभिधेयत्वेन यत्प्रतिपादयितुमिष्यते तद्व्यंग्यं तच्च न सर्वं गुणवृत्तेर्विषयः प्रसिद्ध्यनु
रोधाभ्यामपि गौणानां शब्दानां प्रयोगदर्शनात् यथोक्तं प्राक् यदपि च विषयस्तदपि व्यंजकतानुप्रवेशेन त
स्माद्गुणवृत्तेरपि व्यंजकत्वस्यात्यंतविलक्षणत्वम् वाचकत्वगुणवृत्तिविलक्षणस्यापि च तस्य तदुभयाश्र
यत्वेन व्यवस्थानं व्यंजकत्वं हि क्वचिद्वाचकत्वाश्रयेण व्यवतिष्ठते यथा विवक्षितान्यपरवाच्ये ध्वनौ क्वचित्तु
गुणवृत्त्याश्रयेण यथास्मिन्नविवक्षितवाच्ये ध्वनौ तदुभयाश्रयत्वप्रतिपादनायैव च ध्वनेः प्रथमतरं तौ द्वौ
प्रभेदावुपन्यस्तौ तदुभयाश्रितत्वे च तदेकरूपत्वं तस्य न शक्यं वक्तुं यस्मान्न वाचकत्वैकरूपमेव क्व
चिल्लक्षणाश्रयेण वृत्तेः न च लक्षणैकरूपमेवान्यत्र वाचकत्वाश्रयेण व्यवस्थापनात् न चोभयधर्म
त्वेनैव तदेकैकरूपं न भवति यावद्वाचकत्वलक्षणादिरूपरहितशब्दधर्मत्वेनापि तथा हि गीतध्वनी
नामपि व्यंजकत्वमस्ति रसादिविषयम् न च तेषां वाचकत्वं लक्षणा वा कथंचिल्लक्ष्यते शब्दादन्यत्रापि च

वमस्य वस्त्वलंकृतिनात्क्षयं विस्मयानुपयोगान्न सुगाभासमानत्वाश्चेति त्रिभिः प्रकारैः प्रकाशकत्वस्यैतद्विपरीतरूप

ध्व॰
लोच॰
१३१
१४

त्रयाणां गुणवृत्तेः स्वरूपभेदं व्याख्याय विषयभेदमाह विषयभेदोऽपीति वस्तुमात्रे गुणवृत्तेरपि विषय इत्यभिप्रायेण
विशेषयति व्यंग्यरूपावच्छिन्नमिति व्यंजकत्वस्य यो विषयः अन्यस्य तस्या विषयभेदो योऽन्यः तत्र प्रथमप्रकारमाह तत्रे
ति न च शक्यत इति लक्षणासामग्र्यास्तत्राविद्यमानत्वादिति हि पूर्वमेवोक्तं तथैवेति न तत्र गुणवृत्तिर्मुख्यस्यार्थः वस्तुनो यत्र
वै विशेषणमुक्तं तत्तन्न सावशेषे चारुप्रतीतय इति यदुक्तं कस्यचित्तत्वविभेदस्य सा तस्याउपलक्षणमिति प्रसिद्धिर्नोलावण्या

विषये व्यंजकत्वस्य दर्शनाद्वाचकत्वादिशब्दरूपमेषकारमयुक्तं वक्तुम् यदि च वाचकत्वलक्षणादीनां श
ब्दप्रकाराणां प्रसिद्धप्रकारविलक्षणत्वेऽपि व्यंजकत्वं प्रकारत्वेन परिकल्प्यते तत् शब्दस्यैव प्रकारत्वेन क
स्मान्न परिकल्प्यते तदेवं शाब्दे व्यवहारे त्रयः प्रकाराः वाचकत्वं गुणवृत्तिर्व्यंजकत्वं च तत्र व्यंजकत्वे यदा
व्यंग्यप्राधान्यं तदा ध्वनिः तस्य चाविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्वौ प्रभेदावनुक्रान्तौ प्रथमतरं सवि
स्तरं निर्णीतौ अन्योऽब्रूयात् ननु विवक्षितान्यपरवाच्ये ध्वनौ गुणवृत्तिता नास्तीति यदुच्यते तद्युक्तम् ।

इयः शब्दाः वृत्तान्तरोपव्यवहाराद्ये ये वदन्ति बिसिनीपत्रशयनमित्येवमादयः प्राग्गिति प्रथमोद्योतन्नपर्याय विष
ये मन्त्रे त्यज्ञातरेन सर्वमिति यथास्माभिर्व्याख्यातं तथैव स्फुटयति यद्यपि चेति गुणवृत्तेरिति पंचमी अप्रधुनेन रूपा
पजीवकत्वेन च तदितरः सातिशयेन न पर्यायेण वाचकत्वाद्गुणवृत्तेश्च द्वितीयादपि भिन्नं व्यंजकत्वमित्युपपादयति
वाचकत्वेति वावयोरतोऽभिन्नक्रमः अपि शब्दोऽभिन्नक्रमः नैकेवलं पूर्वोक्तो हेतुः कलापो यावदनुभयापत्वेन ॥ ।३।

म(ख्यो)पचाराश्रयत्वेन यद्यवस्थानं तदपि वाचकत्वगुणवृत्तिविलक्षणत्वेनैवेति व्याप्तिपूर्वकं तेन यत्नात्प्रयोज्यः यद्भया
श्रयत्वेन व्यवस्थानाद्रूपभयादेव लक्षणमिति एतदेव विभजति व्यंजकत्वेति इति शब्दमत्रमितिशब्दो द्योते स चेत्यादिना ग्रन्थे
न हेत्वन्तरमपि सूचयति शब्दस्यैवेति वाचकत्वगौणत्वाभ्यामन्यद्व्यंजकत्वं शब्दादन्यत्रापि वर्तमानत्वात्तमेव यत्वादिव
दिति हेतुः सूचितः ननु अन्यत्रावाचके यद्व्यंजकं तद्विलक्षणमेवास्त्वित्याशंक्याह यद्यपीति आदिपदेन गोत्वादिकं शब्दस्य
शब्दस्यैवेति व्यंजकत्वं वाचकत्वमिति हि यद्यपि योग्यत्वेपि इच्छायामव्याहतत्वात् व्यंजकस्य तथा विवक्षितस्वरूपं दर्शि

यस्माद्वाच्यवाचकप्रतीतिपूर्विका यत्रार्थप्रतीतिस्तत्र कथं गुणवृत्तिव्यवहारः न हि गुणवृत्तौ य
दा निमित्तेन केनचिद्विषयान्तरे शब्द आरोप्यते अत्यन्ततिरस्कृतवाच्यस्य यथाग्निर्माणवक इत्यादौ यदि वा
स्वार्थमंशेनापरित्यजंस्तत्संबन्धद्वारेण विषयान्तरमाक्रामति यथा गंगायां घोष इत्यादौ तदा विवक्षितवा
च्यत्वमुपपद्यते अत एव विवक्षितान्यपरवाच्ये ध्वनौ वाच्यवाचकयोर्द्वयोरपि स्वप्रतीतिरर्थावगमने चरूप

न तत्र विषयान्तरे कथं विपर्ययस्य नाम एवं हि पर्वतगतोऽधूमोऽनग्निजोऽपि स्यादिति भावः अयुक्तोपपत्तिस्ते विभावा
म उपपत्तेः ह्रासः इति न देवमिति व्यवहारग्रहणेन समुद्रघोषादीन्दर्शयति ननु वाचकत्वे पोजीवकत्वादिति चेदेतदयं
तु क्रम तदविवक्षितवाच्यभागासिद्धे न भवति न स्खलद्गतिकशरीरत्वादित्यभिप्रायेणोपक्रमते अथ्याप्तेः यादि
ति निर्णीतवरमेव न तथापि गुणवृत्तेः विवक्षितवाच्यस्य च तुल्यमिति लक्षणं प्रपश्यति तत्प्रसंगशंकां निवारयन्

ध्व॰
लोच॰
१३२

132

र्थोयमुपक्रमः अत एवाद्यभेदस्याङ्गीकारपूर्वकमयं द्वितीयभेदाक्षेपः विवक्षितान्यपरस्याप्युदाहरणादिनाप्युपगम
स्यास्वाङ्गीकारोऽदर्श्यते गुणवृत्तिव्यवहाराभावे हेतुं दर्शयितुं तस्याप्येवं गुणवृत्तेरलावण्यं तद्दर्शयति नहीति गुणतया
वृत्तिर्व्यापारो गुणवृत्तिः गुणेन निमित्तेन सादृश्यादिना वृत्तिर्व्यापारो गुणवृत्तिः गुणेन निमित्तेन सादृश्यादिना वृत्तिर
र्थान्तरविषयेऽपि शब्दस्य सामानाधिकरण्यमिति गौणं दर्शयति यदा वाच्यार्थमिति लक्षणां दर्शयति अनेनैतद्भेदद्वयेन तव
स्वीकृतमविवक्षितवाच्ये भेदद्वयात्मकमिति सूचयति अत एवात्यन्ततिरस्कृतस्वार्थशब्देन तदेव भेदद्वयं सूचयति अ

इति व्यञ्जकत्वव्यवहारो युक्तो योऽपि स्वरूपं प्रकाशयन्नेव परावभासनो व्यञ्जक इत्युच्यते तथाविधे च विषये वा
चकस्यैव व्यञ्जकत्वमिति गुणवृत्तिव्यवहारो नियमेनैव या वानेव कर्तुं अविवक्षितवाच्यस्य ध्वनेर्गुणवृत्तेः क
थमिष्यते तस्य प्रभेदद्वये गुणवृत्तिभेदद्वयरूपता लक्ष्यत एव यतोऽयमपि न दोषो यस्मादविवक्षितवा
च्यो ध्वनिर्गुणवृत्तिमार्गाश्रयो भवति न तु गुणवृत्तिरूप एव ॥ ५९ ॥

तप एव चेति यतो न तत्रोक्तहेतुबलाद्गुणवृत्तिव्यवहारोऽन्याय्यस्तत्रार्थः युक्तिं लोकप्रसिद्धरूपामबाधितामिति द
र्शयति स्वरूपमिति उच्यत इति प्रदीपादिः शब्दादेस्तु कारणत्वेन व्यञ्जकत्वप्रतीत्युपपत्तेः एवमभ्युपगमे प्रदर्श्यादे
पं दर्शयति अविवक्षितेत्यादिना पादः सर्वस्मादित्यपि शेषो भण्यते तस्येति अविवक्षितवाच्यस्य यत्प्रभेदद्वयं तद्गुणला
क्षणिकत्वात्मकं प्रकारद्वयं लक्ष्यते तन्निभासनेऽर्थः एतत्सविद्रवति अयमपीति योऽसौ मार्गः प्रभेदद्वयं स आश्रयेण निमि
त्ततया ग्राह्यकत्वानिवेशो यस्येत्यर्थः एतच्च पूर्वमेव निर्णीतमतादृश्याभावेदृत्तमाह ५९ ॥

गौणलाक्षणिकरूपो मध्यमीत्यर्थः ५७ ननु व्यंजकत्वेन कथ्यमानस्या गुणवृत्तिर्भवति यतः पूर्वोक्तेषूदाहृतेषु फ
लेगुणवृत्त्यर्थदर्शनेन च ननु शब्दः स्खलद्गतिरिति निनाद्युपाजत्पन्नया उपचारः प्रयोजनांशनिवेशी व्यंजकव्यापारद्
तिम वह्निरेवास्थाप्यार्थ्याशंक्याह वाच्यधर्मेति वाच्यविषयो यो धर्मोऽभिधाव्यापारस्तमाश्रयेण तेनोपचारेण लक्षणा येन
घः स्खलितार्थोपदर्शिविधानार्थो न तस्याभिधेयार्थोपदानपर्यवसानादितिभावः ५८ तत्र गौणलक्षणोदाहरणमाह।

गुणवृत्तिर्हि व्यंजकत्वशून्यापि दृश्यते ५७ व्यंजकत्वं यथोक्तं चारुत्वप्रतीतिहेतुकं व्यंग्यं विना
न व्यवतिष्ठते गुणवृत्तिस्तु वाच्यधर्माश्रयेण व्यंग्यमात्राश्रयेण वाभेदोपचाररूपा संभवति ५८ य
था तीक्ष्णत्वादग्निर्माणवकः आह्लादकत्वाच्चन्द्र एवास्या मुखमित्यादौ यथा च प्रिये जने नास्ति पुनरु
क्तमित्यादौ ५९ यापि लक्षणारूपा गुणवृत्तिः सापि उपलक्षणीयार्थसंबंधमात्राश्रयेण चारुरूप
व्यंग्यप्रतीतिं विना संभवत्येव यथा मंचाः क्रोशन्तीत्यादौ विषये ६० यत्र तु सा चारुरूपव्यंग्यप्रती
तिहेतुस्तत्र व्यंजकत्वानुप्रवेशेनैव वाचकत्ववत् ६१ ॥

द्वितीयमपि प्रकारं व्यंजकत्वशून्यं निदर्शयितुमुपक्र
मेत ५९ चारुरूपे विश्रान्तिस्थाने तदभावे सव्यंजकत्वव्यापारो नैवोन्मीलति यथा हृद्यवाच्यरूपपर्यवसाने; लक्षण
दृष्टनष्टदिव्यविभवशक्रकृतवृत्रवत् ६० ननु यत्र व्यंग्यपर्यवसानं तत्र किं कर्तव्यमित्याशंक्याह अस्ति नत्रापरोऽव्य
जनव्यापारः परिस्फुरत्येवेत्यर्थः दृष्टान्तोपरांगीकृतमेव स्वावकत्वादिति वाचकत्वे हि तथैवांगीकृतो व्यंजनव्यापारः

किंच वस्तुतो नैरन्तर्यं न संभवति संभवदेव वस्तुतो नैरन्तर्यमेवारोप्यते विधायकस्य सुवर्णपुष्पाणामत्र मूलतया वासंभवः ननु स्व
नयनस्य कथमारोपव्यवहारः सुवर्णपुष्पां पृथिवीमित्यादिवाक्यादारोपस्तस्मात् व्यञ्जनव्यापार एव प्रधानभूतो नारोपस्त
स्मात् व्यञ्जनव्यापारस्य प्रधानभूतो नारोपव्यवहारः स एव व्यञ्जनव्यापारानुरोधितयोपन्यस्त इति तदाह १ प्रयोजिकेति
व्यङ्ग्यमेव हि प्रयोजनं तेषु प्रतीतिविश्रामस्थानमारोपितेन संभवति प्रतीतिविश्रान्तिराशंकनीयापि न भवति :: स
त्यामपीति व्यञ्जनव्यापारसम्पत्त्यैव लक्षणामात्रमवलम्बितायामिति भावः १ व्यञ्जकत्वलक्षणयोर्विशेषः तेनाविशिष्ट

स्य संभवितावाच्येनेत्यत्र व्यवहारो यथा सुवर्णपुष्पां पृथिवीमित्यादौ तत्र चारुरूपव्यङ्ग्यप्रतीतिर्विवक्षितोऽपि
